§ २१. ननु हेतोरद्वैतसिद्धावपि न हेतुसाध्ययोर्द्वैतं भविष्यति, तादात्म्योपगमात्। न च तादात्म्ये साध्यसाधनयोस्तद्भावविरोधः; सत्त्वानित्यत्वयोरपि तथा भावविरोधानुषंगात्। कल्पनाभेदादिह साध्यसाधनधर्मभेदे[१] प्रकृतानुमानेऽपि कथमविद्योपकल्पितहेतुसाध्ययोस्तद्भावविघातः; सर्वथाविशेषाभावादिति[2] चेत्, न; शब्दादौ [3]सत्त्वानित्यत्वयोरपि[4] कथंचित्तादात्म्यात्सर्वथातादात्म्यासिद्धेः,[5] तत्सिद्धौ साध्यसाधनभावविरोधात्। न चासिद्धमुदाहरणं नाम, अतिप्रसङ्गात्। किं च न सम्यगिदं साधनं विरुद्धत्वात्, प्रतिभास-तद्विषयाभिमतयोः[6] कथञ्चिद्भेदे सति समानाधिकरणत्वस्य प्रतीतेः सर्वथा प्रतिभासान्तः[7]प्रविष्टत्वाऽसाधनात् स्वविषयस्य। न हि 'शुक्लः पटः' इत्यादावपि[8] सर्वथा गुणद्रव्ययोस्तादात्म्ये [9]सामानाधिकरण्यमस्ति, सर्वथाभेदवत्। 'प्रतिभासस्वरूपं प्रतिभासते' इत्यत्रापि न प्रतिभास[10]तत्स्वरूपयोर्लक्ष्यलक्षणभूतयोः सर्वथा तादात्म्यमस्ति; प्रतिभासस्य साधारणाऽसाधारणधर्माधिकरणस्य स्वस्वरूपादसाधारणधर्मात् कथञ्चिद्भेदप्रसिद्धेः, अन्यथा तत्सामानाधिकरण्यायोग्यात्[11] 'सुवर्णं सुवर्णम्' इति यथा, सह्यविन्ध्यवद्वा[12]। तदेवं[13] यत् प्रतिभाससमानाधिकरणं तत्प्रतिभासात् कथञ्चिदर्थान्तरम्; यथा प्रतिभासस्वरूपम्; प्रतिभाससमानाधिकरणं च सुखनीलादि सर्वमिति साध्यविपरीतसाधनात् हेतोर्नाद्वैतसिद्धिः।

§ २२. अथागमस्तत्साधकोऽस्त्येव "सर्वं वै खल्विदं ब्रह्म" [मैत्रा० ४।६] इत्याद्यागमस्य परमब्रह्मसाधकस्य सद्भावादिति चेत्, तदपि स्ववधाय कृत्योत्थापनमेव, अद्वैत-तदागमयोर्द्वैतप्रसंगात्।

§ २३. यदि पुनरागमोऽप्यद्वयपुरुषस्वभाव एव न ततो व्यतिरिक्तो येन द्वैतमनुषज्यते इति मतम्,

"ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्॥"

[भगवद्गी० १५।१]

इति वचनात्। तदा[14] ब्रह्मवत्तदागमस्याप्यसिद्धत्वं[15] स्यात्, [16]सर्वथाप्यसिद्धस्वभावस्य सिद्धत्वविरोधात्, सिद्धाऽसिद्धयोर्भेदप्रसक्तेः।

§ २४. किंच "सर्वं वै खल्विदं ब्रह्म" [मैत्रा० ४।६] इत्याद्याम्नायादपि द्वैतसिद्धिरेव स्यात्, सर्वस्य प्रसिद्धस्याऽप्रसिद्धेन ब्रह्मत्वेन विधानात्। सर्वथा प्रसिद्धस्य [17]विधानायोगादप्रसिद्ध-

---

१. सत्त्वमसत्त्वव्यावृत्त्यात्मकम्, अनित्यत्वञ्च नित्यव्यावृत्त्यात्मकमिति व्यावृत्तिभेदात्तयोर्भेदे।

1. –प्रतिविष्टत्वेन क०। 2. सर्वथाविशेषादिति क०। 3. सत्या क०, ख०। 4. –नित्ययोः ग०। 5. कथंचित्तादात्म्यासिद्धेः क०। 6. तद्विषयासि—क०। 7. प्रतिभासतः ग०। 8. इत्यादिनावपि क०, ख०। 9. सामाधिकरण्यमस्ति क०। 10. प्रति तत् क०। 11. योगात् ख०। 12. विन्ध्य क०। 13. तदेव ग०। 14. तथा क०, ख०। 15. –मस्यासि– ग०। 16. सर्वप्य क०। 17. विधानयोगात् क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वत्[1]। क्वचिदात्मव्यक्तौ प्रसिद्धस्यैकात्म्यरूपस्य ब्रह्मत्वस्य सर्वात्मस्वनात्माभिमतेषु च विधानात्। द्वैतप्रपञ्चारो[1]पव्यवच्छेदेऽपि तदागमाद् व्यवच्छेद्यव्यवच्छेद[2]कसद्भावसिद्धेः कथमद्वैतसिद्धिः? आम्नायस्य परमब्रह्मस्वभावत्वे न ततस्तदद्वै[3]तसिद्धिः[4]। स्वभाव-स्वभाववतोस्तादात्म्यैकान्तानुपपत्तेः।

§ २५. अथ स्वसंवेदनमेव पुरुषाद्वैतसाधकमिति चेत्; न; स्वसंवेदनात्मनोर्द्वैतप्रसंगात्। न हि स्वसंवेदनमपि साधनमात्मनोऽनन्यदेव; साधनत्वविरोधात्, अनुमानागमवत् साध्यस्यैव साधनत्वोपपत्तेः, प्रकृतानुमानागमयोरिव[5] स्वसंवेदनप्रत्यक्षस्यापि साधन[त्व]स्याभावात्।

§ २६. न च पुरुषाद्वैतं स्वतः सिद्ध्यति, विज्ञानाद्वैतवत्, स्वरूपस्य स्वतोगतेरभावात्, अन्यथा कस्यचित्तत्र विप्रतिपत्तेरयोगात्[6], विज्ञानाद्वैतस्यापि प्रसिद्धेरिष्टहानिप्रसंगाच्च[2]।

§ २७. ननु[3] विज्ञानाद्वैतं न स्वतोऽवसीयते, तस्य[4] क्षणिकस्यैकक्षणस्थायितया निरंशस्यैकपरमाणुरूपतया सकृदप्यनुभवाभावादिति चेत्; न, पुरुषाद्वैतस्यापि नित्यस्य सकलकालकलाकलापव्यापितया सर्वगतस्य च सकलदेशप्रतिष्ठिततया सकृदप्यनुभवाभावाऽविशेषात्[7]। 'स्वतःसिद्धं ब्रह्म' इत्युपगमे; द्वैतमपि स्वतःसकलसाधनाऽभावेऽपि किं न सिद्ध्येत्; तत्त्वोपप्लवमात्रं वा नैरात्म्यं वा [8]स्वाभिलापमात्राविशेषा[5]त्? सर्वस्य सर्वमनोरथसिद्धिरपि दुर्निवारा स्यात्। एवं [9]परब्रह्मसाधकस्य कस्यचिदपि प्रमाणस्याभावात् भेदग्राहिप्रत्यक्षस्य[10] बाधकाभावो व्यवतिष्ठत एव, [11]एतदन्यस्यापि बाधकस्य अयोगात्।

§ २८. स्यादाकूतम्--विवादापन्नं प्रत्यक्षादि मिथ्यैव, भेदप्रतिभासत्वात्, स्वप्नप्रत्यक्षादिवदिति; तदसत्; प्रकृतानुमाने पक्ष-हेतु-दृष्टान्तभेदप्रतिभासस्याऽमिथ्यात्वे तेनैव[12] हेतोर्व्यभिचारात्। तन्मिथ्यात्वे तस्मादनुमानात् साध्याऽप्रसिद्धेः। पराभ्युपगमात् पक्षादिभेदप्रतिभासस्याऽमिथ्यात्वेऽपि न दोषः इति चेत्; न; स्वपराभ्युपगमभेदप्रतिभासेन व्यभिचारात्। तस्यापि पराभ्युपगमान्तराद[13]मिथ्यात्वाद्दोषाभावे स एव तद्भेदप्रतिभासेन व्यभिचारः[14]इति न क्वचिद्व्यवतिष्ठेत्।

§ २९. कश्चिदाह—ब्रह्माद्वैतस्यामिथ्यासंविन्मात्रस्य[15] स्वतः सिद्धस्य क्रियाकारकभेदप्रत्यक्षादीनां [16]बाधकस्याभावात्तेषां[6] भ्रान्तत्वं ततो न तद्विरोधकत्वमिति; तदपि न साधीयः, तथा सति बाध्यबाधकयोर्भेदात्, द्वैतसिद्धिप्रसंगात्।

---

१. यथा सर्वथाऽप्रसिद्धं खरविषाणादि न विधीयते। २.-तुलना-"तद्धि संवेदनाद्वैतं न तावत्स्वतः सिद्ध्यति पुरुषाद्वैतवत्, स्वरूपस्य स्वतोगतेरभावात्, अन्यथा कस्यचित्तत्र विप्रतिपत्तेरयोगात्, पुरुषाद्वैतस्यापि प्रसिद्धेरिष्टहानिप्रसङ्गाच्च।" -आप्तप० पृ० १८२। ३.-तुलना-"ननु च पुरुषाद्वैतं न स्वतोऽवसीयते, तस्य नित्यस्य सकलकालकलापव्यापितया सर्वगतस्य च सकलदेशप्रतिष्ठिततया वाऽनुभवाभावादिति चेत्; न, संवेदनाद्वैतस्यापि क्षणिकस्यैकक्षणस्थायितया निरंशस्यैकपरमाणुरूपतया सकृदप्यनुभवाभावाविशेषात्।" -आप्तप० पृ० १८२। ४. यथा हि विज्ञानाद्वैतवादिनोक्तम्—"स्वरूपस्य स्वतोगतेः" [प्र० वा० १।५] इति नोपपद्यते तथैव। ५. कथं न सिद्ध्येत्? ६. क्रियाकारकादीनाम्।

1. -रोपो व्य-क०, ख०। 2. -माद् व्यवच्छेदक-ग०। 3. -तदद्वैत० ख०। 4. क० प्रतौ इयं पंक्तिर्नास्ति। 5. -रेव क०। 6. -तिरयो० क०, ख०। 7. क० प्रतौ 'न च पुरुषद्वैतं...इत्यस्मात् पदादारभ्य...अविशेषात्' इति पर्यन्तं पाठो नास्ति। 8. -मात्रविशे० क०, ख०। 9. परमब्रह्म ख०, ग०। 10. -प्रत्यक्ष ख०। 11. तदन्यस्यापि ग०। 12. -त्वेनैव। 13. मिथ्याद्दो० क०, ख०। 14. तद्भेदेन व्यभि० ख०। 15. द्वैतस्य संवि० ख०। 16.-कस्यभावात् ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ ३०. न च परोपगममात्रात्तयोर्बाध्यबाधकभावः, [1]परमार्थतस्तदभावापत्तेः। ततः सकलबाधकाभावात् अभ्रान्तेन प्रत्यक्षेण प्रसिद्धोऽयं भेदः कथमद्वैतं न [2]विरुन्ध्यात्। तयोः[1] परस्परविरोधात्। तत एव भेदमद्वैतं विरुन्ध्यादिति चेत्; न; अद्वैतस्याभ्युपगममात्रत्वात्, तत्साधकप्रमाणाभावस्य प्रागेवोक्तत्वात्, भेदस्य [3]च प्रमाणसिद्धत्वात्, तद्ग्राहिप्रत्यक्षस्य बाधकाभावात्, अभ्रान्तत्वेन साधितत्वात्। नहि कस्यचिदभ्युपगममात्रं प्रमाणसिद्धं क्रियाकारकभेदं प्रतिरुणद्धि, क्षणिकाभ्युपगमवत्। तदेवं [4]सकलबाधकवैधुर्यादभ्रान्तप्रत्यक्षप्रसिद्धक्रियाकारकभेदः, सोऽयमद्वैतैकान्तपक्षे विरुध्यत एवेति सिद्धं परमब्रह्माद्वैतशासनं प्रत्यक्षविरुद्धमिति। तदुक्तं श्रीस्वामिसमन्तभद्राचार्यैः—

"अद्वैतैकान्तपक्षेऽपि दृष्टो भेदो विरुद्ध्यते।
कारकाणां क्रियायाश्च नैकं स्वस्मात् प्रजायते॥"

[आप्तमी० श्लो० २४] इति

§ ३१. एतेनैव इष्टविरुद्धं [5]चाद्वैतशासनम्। उक्तं च अद्वैतसाधकानुमानागमाभ्यां[6] द्वैतस्य सिद्धेरुक्तत्वात्। अद्वैतशब्दः [7]स्वाभिधेयप्रत्यनीकपरमार्थापेक्षः, नञ्पूर्वाऽखण्डपदत्वात्; 'अहेत्वभिधानवत्', इत्यनुमानविरोधाच्च। तदप्युक्तं भगवद्भिः स्वामिभिः

"अद्वैतं न विनाद्वैतादहेतुरिव हेतुना।
संज्ञिनः प्रतिषेधो न प्रतिषेध्यादृते क्वचित्॥"

[आप्तमी० श्लो० २७] इति

§ ३२. तथा ब्रह्मवादिनां धर्मानुष्ठानं न प्रतिष्ठामियर्ति, तेषां पुण्यपापसुखदुःखेहपरलोकविद्येतरबन्धमोक्षासंभवात्, तत्त्वोपप्लववादिवत्। तथैव स्वामिनः प्राहुः—

"कर्मद्वैतं फलद्वैतं लोकद्वैतं च नो भवेत्।
विद्याऽविद्याद्वयं न स्याद्बन्धमोक्षद्वयं तथा॥"

[आप्तमी० श्लो० २५] इति

§ ३३. एतेन यदुक्तं वेदान्तवादिभिः 'एकमेव ब्रह्म नानात्मतया दृश्यते, ब्रह्मविवर्ताः पृथिव्यादयः, ब्रह्मप्राप्तिर्मोक्षः, श्रवणादिभिः [8]ब्रह्मसाक्षात्कार' इत्यादि, तत्सर्वं बन्ध्यास्तनन्धयसौरूप्यव्यावर्णन[3]वदुपेक्षामर्हति, केनापि प्रमाणेन ब्रह्मसिद्धेरभावात्, अन्यथा प्रमाणप्रमेयैर्द्वैतप्रसंगात्[9]। भ्रान्तेन प्रमाणेन तत्सिद्धौ स्वप्नोपलब्धधूमादिना परमार्थपावकादिसिद्धिप्रसंगात्। चन्द्रमरीचिजालसन्निधिविशेषात् परिणमज्जल[10]पुद्गलविकारत्वात् परमार्थेनैव प्रतिबिम्बेन चन्द्रप्रतिपत्तेः। भ्रान्तेन प्रमाणेन प्रमाणमन्तरेण वा ब्रह्माद्वैतसिद्धौ तथा द्वैत-नैरात्म्यादिसिद्धिरपि दुर्निवारा स्यात्। तथा[11] द्वैताऽद्वैतयोर्बाधकसाधकाभावाद्वेदान्तिनां दृष्टहानिरदृष्टकल्पनेयं केवलमुपहासाय जायते।

---

१. भेदाभेदयोः। २. तुलना—अष्टस०, १६१। ३. "एष बन्ध्यासुतो याति खपुष्पकृतशेखरः। मृगतृष्णाम्भसि स्नात्वा शशश्रृङ्गधनुर्धरः॥" इत्यादि व्यावर्णनवत्। ४. रूपेण द्वैतप्रसङ्गात्।

1. परमार्थः ग०। 2. –द्वैतं विरु० क०, ग०। 3. –वोक्तत्वात्तस्य च ग०। 4. –क वैधुर्या० ख०, ग०। 5. ग० प्रतौ 'च' नास्ति। 6. –मानाभ्यां क०, ख०। 7. सामिधेय ख०। 8. श्रवणादिना परमार्थभिः ब्रह्म० ग०। 9. –मेयप्रस० क०, ख०। 10. –मज्वलपु० ख०। 11. ततो ख०, ग०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ ३४. किं च, यद्येकमेव [1]परब्रह्मास्ति तर्हि तदेव कुतो न [2]प्रतीतिपथमवतरति, यदि वा प्रपञ्चः खरविषाणवदभावरूपः कुतस्तर्हि स एव 'अहमहमिकतया प्रतीतिपथमापनिपद्यते[3] इति पृष्टः [4]स्पृष्टमाचष्टां परः अविद्यया[5] तथेति चेत्, तदसत्; अविद्याया एव परोपवर्णितस्वरूपाया व्यवस्थापयितुमशक्तेः, विकल्पानतिक्रमात्। अविद्याया असत्त्वे, मिथ्याप्रतीतिहेतुत्वानुपपत्तेः, सत एव अदृष्ट-दोष-संस्कार-[6]यन्त्र-मन्त्र-तन्त्रादेः स्वप्नेन्द्रजालादिमिथ्याप्रतीतिहेतुत्वप्रतिपत्तेः। तस्याः सद्रूपत्वे द्वैतसिद्धिः[7] प्रसक्तेरिति। अविद्यायाः सदसत्त्वाभ्यामनिर्वाच्यत्वे कथम् 'अविद्या संसारदशायामस्ति, संसारस्याऽविद्याविलासत्वात्; मुक्तिदशायां तु नास्ति, मुक्तेरविद्यानिवृत्तिरूपत्वात्' इति शिष्यं प्रति प्रतिपाद्येत। तदा[8] तस्याः[2] सदसत्त्वाभ्यां वाच्यत्वसंभवात्। तथा चाप्रतिपादने विनेयानां कथं मोक्षाय प्रवृत्तिः, संसारमोक्षस्वरूपानवबोधात्। 'अनिर्वाच्याऽविद्या' इत्यविद्यास्वरूपकथनमिदं स्ववचनविरुद्धम्—

"यावज्जीवमहं मौनी ब्रह्मचारी च मत्पिता।
माता मम भवेद्वन्ध्या स्मरा[3]भोऽनुपमो भवान्॥"

[ ]

इत्यादि वचनवत्। अनिर्वाच्यशब्देनाविद्यानभिधाने चानर्थकवचनतया निग्रहस्थानत्वापत्तेः।

§ ३५. ननु वस्तुन्येव[9] प्रमाणप्रवृत्तिर्नावस्तुनि। ततोऽस्माभिर्वस्तुवृत्तमपेक्ष्याविद्या[10]व्यवस्थाप्यते। तदुक्तम्—

"ब्रह्माविद्यावदिष्टं चेन्ननु दोषो महानयम्।
निरवद्ये[11] च विद्याया आनर्थक्यं प्रसज्यते॥
नाविद्यास्येत्यविद्यायामेवासित्वा प्रकल्प्यते।
[12]ब्रह्म[धारा]त्वविद्येयं न कथञ्चन युज्यते॥
यतोऽनुभवतोऽविद्या ब्रह्मास्मीत्यनुभूतिमत्।
अतो मानोत्थविज्ञान-ध्वस्तासाप्यन्यथात्मता[13]॥
ब्रह्मण्यविदिते[14] बाधान्नाविद्येत्युपपद्यते।
नितरां चापि विज्ञाते [15]मृषा[धी]र्नास्त्यबाधिता॥
अविद्यावानविद्यां तां न निरूपयितुं क्षमः।
वस्तुवृत्तमतोऽपेक्ष्य[16] नाविद्येति निरूप्यते॥
वस्तुनोऽन्यत्र मानानां व्यापृत्तिर्नहि युज्यते।
अविद्या च न वस्त्विष्टं मानाघातासहिष्णुतः॥
अविद्याया अविद्यात्वे इदमेव च लक्षणम्।
मानाघातासहिष्णुत्वमसाधारणमि[17]ष्यते॥"

[संबन्धवा० श्लो० १७५-८१]

१. पुण्यपापरूपकर्म। २ अविद्यायाः। ३. भवान् स्मरामः कामतुल्यकान्तिः तथापि अनुपमः उपमारहितः इति स्ववचनविरुद्धम्।

1. परमब्रह्मास्ति ख०, ग०। 2. –तिप्रथम० क०, ख०। 3. –मापनीपद्यते क०। 4. –ति पृष्टमाचष्टां क०, ग०। 5. अविद्याया क०। 6. –दोषयन्त्र क०, ख०। 7. द्वैतप्रसिद्धिः ग०। 8. तथा ग०। 9. वस्तुनैव क०, ख०। 10. –मपेक्षावि० क०, ख०। 11. निरविद्ये क०, ग०। 12. ब्रह्माद्धारात्व० क०, ख०, ग०। 13. –थात्मना ख०। 14. विधीते क०। 15. मृषादेर्नास्ति क०। मृषादिर्नास्ति ग०। 16. मस्तुवृत्तमतोपेक्ष ना० क०। 17. –रण इष्यते क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ ३६. न चैवमप्रामाणिकायामविद्यायां [1]कल्प्यमानायां कश्चिद्दोषः, तस्याः संसारिणः स्वानुभवाश्रयत्वात्। द्वैतवादिन एव दृष्टादृष्टार्थप्रपञ्चस्य प्रमाणबाधितस्य [2]कल्पनायामनेकविधायां बहुविधदोषानुषंगात्। तदप्युक्तम्—

"त्वत्पक्षे बहुकल्प्यं स्यात् सर्वं मानविरोधि च।
कल्प्याऽविद्यैव मत्पक्षे सा [3]चानुभवसंश्रया॥"

[संबन्धवा० श्लो० १८२] इति

§ ३७. इति कश्चित्, सोऽपि न प्रेक्षावान्, सर्वप्रमाणातीतस्वभावायाः स्वयमविद्यायाः स्वीकरणात्। नहि प्रेक्षावान् सकलप्रमाणातिक्रान्तरूपामविद्यां विद्यां वा[4] स्वीकुरुते।

§ ३८. न च प्रमाणानामविद्याविषयत्वमयुक्तम्; विद्यावदविद्यायां अपि कथंचिद् वस्तुत्वात्। तथा विद्यात्वप्रसंगः, इति चेत्; न किंचिदनिष्टम् **"यथा यत्राविसंवादस्तथा तत्र प्रमाणता।"** [सिद्धिवि० १।१९] इत्यकलङ्कदेवैरप्युक्तत्वात्। बहिःप्रमेयापेक्षया तु कस्यचित् संवेदनस्याविद्यात्वं बाधकप्रमाणावसेयं कथमप्रमाणविषयः, तद्बाधकं पुनरर्थान्यथात्वसाधकमेव प्रमाणमनुभूयत इति वस्तुवृत्तमपेक्ष्यैवाविद्या निरूपणीया।

§ ३९. न च कथंचिद्विद्यावतोऽप्यात्मनः प्रतिपत्तुरविद्यावत्त्वं विरुध्यते यतोऽयं महान् दोषः[5] स्यात्। नाप्यविद्याशून्यत्वे कथंचिद्विद्यानर्थक्यं प्रसज्यते, तत्फलस्य सकलविद्यालक्षणस्य [6]भावात्।

§ ४०. न चाविद्यायामेव स्थित्वा 'अस्येयमविद्या' इति प्रकल्प्यते, सर्वस्य विद्यावस्थायामेव अविद्येतरविभागविनिश्चयात्[7], स्वप्नाद्यविद्यादशायां तदभावात्। ततश्चात्माद्वारैवाविद्या अयुक्तिमती। यस्मादनुभवात् 'अविद्यावानहमस्मि' इत्यनुभववानात्मा तत्[8] एव कथंचित् प्रमाणोत्थविज्ञानाबाधितादविद्यापि [9]सैवेत्यात्मताविरोधाभावात्। न चात्मनि कथंचिद् [10]विदितेऽप्यविद्येति नोपपद्यते, बाधाविरोधात्। कथंचिद्विज्ञातेऽपि वाऽविद्येति नितरां घटते। विदितात्मन एव तद्बाधकत्वविनिश्चितेः कथंचिद्बाधितायाः बुद्धेर्मृषात्वसिद्धेः।

§ ४१. न च कथंचिदविद्यावानेव नरस्तामविद्यां निरूपयितुं क्षमः, सकलप्रेक्षावद् व्यवहारविलोपात्। यदपि प्रमाणाघातासहिष्णुत्वमसाधारणं लक्षणमविद्यायाः, तदपि प्रमाणसामर्थ्यादेव निश्चेतव्यमिति[11] न प्रमाणातिक्रान्ता काचिदविद्या नाम, यदभ्युपगमे ब्रह्माद्वैतं न विरुद्ध्येत[12]।

[इति पुरुषाद्वैतशासनपरीक्षा]

---

१. तुलना—अष्टसह० पृ० १६२-१६३।

1. कल्प० क०। 2. कल्पनाम० क०। 3. सानुभ० क०। 4. -मविद्यां वा ग०। 5. महादोषः ख०। 6. लक्षणभावात् ख०। 7. -गनिश्च० क०। 8. -वाना ततः ख०। 9. सैरेत्या० ख०। 10. विधीयतेप्य० क०। 11. निश्चि० क०। 12. विरुद्धेत् ग०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[शब्दाद्वैतशासनपरीक्षा]

§ ४२. तदेतेन शब्दाद्वैतमपि निरस्तम्, पुरुषाद्वैतवत्तस्यापि[1] निगदितदोषविषयत्वसिद्धेः। प्रक्रियामात्रभेदात्तदव्यवस्थानुपपत्तेः, स्वपक्षेतरसाधकबाधकप्रमाणाभावाविशेषात्, स्वतः सिद्धय-योगाद्गत्यन्तराभावाच्चेत्यलमतिप्रसंगिन्या कथया। सर्वथैवाद्वैतस्य दृष्टेष्टविरुद्धत्वेनासत्यत्वस्य व्यवस्थितत्वात्।

ब्रह्माविद्याप्रमापायात् सर्वं वेदान्तिनां वचः।
भवेत्प्रलापमात्रत्वान्नावधेयं विपश्चिताम् ॥
ब्रह्माद्वैतमतं सत्यं न दृष्टेष्टविरोधतः।
न च तेन प्रतिक्षेपः स्याद्वादस्येति निश्चितम् ॥

[इति शब्दाद्वैतशासनपरीक्षा]

---

1. द्वैतत्तस्यापि ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[विज्ञानाद्वैतशासन-परीक्षा]

तथा विज्ञानाद्वैतशासनं दृष्टेष्टविरुद्धम्,

[पूर्वपक्षः]

§ १. तथा हि—तावदिदं खलु विज्ञानाद्वैतिनामिष्टम्, अन्तरङ्गस्य स्वसंविदितज्ञानस्यैव वस्तुता न तु बहिरङ्गस्यार्थस्य, जडस्य प्रतिभासायोगात्,[1] वेद्यवेदकलक्षणस्य परपरिकल्पितस्य व्यभिचारित्वात्।

§ २. [तत्र[2]] तावत्सौत्रान्तिकपरिकल्पिततज्जन्मताद्रूप्यतदध्यवसायाः न प्रत्येकं वेद्य-वेदकलक्षणम्; चक्षुषा[1] समानार्थसमनन्तरवेदनेन[2] शुक्तिकायां रजताध्यवसायेन[3] च व्यभिचारात्। सह वा समानार्थसमनन्तरज्ञानेन, कामलाद्युपहतचक्षुषः शुक्ले शङ्खे [3]पीताकारज्ञानसमनन्तरज्ञानेन[4] च व्यभिचारात्।

§ ३. योगाङ्गीकृतं [5]कार्यनिमित्तकारणत्वमपि न तल्लक्षणम्, चक्षुषानेकान्तात्। तथा अन्य-परिकल्पितकार्यकारणभावाख्यप्रभवयोग्यतादिकमपि न तल्लक्षणम्; तेनैव व्यभिचारात्[6]। ततः कस्यचि-दपि ग्राह्यग्राहकलक्षणस्यायोगात् सर्वं ग्राह्यग्राहकाकारज्ञानं भ्रान्तमेव। तथा प्रयोगः—यद्ग्राह्यग्राहका-कारं तत्सर्वं भ्रान्तम्, यथा स्वप्नेन्द्रजालादिज्ञानम्, तथा च प्रत्यक्षादिकमिति। न हि भ्रान्तप्रत्यक्षा-दिकं बहिरर्थस्य व्यवस्थापकम्, स्वप्नप्रत्यक्षादेरपि अर्थव्यवस्थापकत्वप्रसंगात्। एवं युक्त्या अनुपपद्यमाना बहिरर्था दृष्टा अपि न श्रद्धेयाः,

"युक्त्या यन्न घटामुपैति तदहं दृष्ट्वापि न श्रद्दधे[7]।"

[ ] इति वचनात्।

§ ४. बहिरर्थानामेवमसंभवात् संवित्तिरेव खण्डशः प्रतिभासमाना सकलवेद्यवेदक[4]व्यव-हाराय कल्प्यते। तदुक्तम्—

"नावनिर्न सलिलं न पावको न मरुन्न गगनं न चापरम्।
विश्वनाटकविलाससाक्षिणी संविदेव परितो विजृम्भते॥"

[ ] इति

अन्यच्च,

"एक संविदि विभाति भेदधीर्न्नीलपीत[5]सुखदुःखरूपिणी।
निम्ननाभिरियमुन्नतस्तनी स्त्रीति चित्रफलके समे यथा॥[6]"

[ ] इति

---

१. चक्षुषा घटज्ञानं जायते न तु तत् चक्षुर्ग्राहकम्। २. समानार्थे यत् पूर्वज्ञानादुत्पन्नम् अनन्तर-ज्ञानं तत् पूर्वज्ञानादुत्पन्नम् अथ च पूर्वज्ञानाकारं तथापि नोत्तरं ज्ञानं पूर्वं जानाति, ज्ञानं ज्ञानस्य न नियामकमिति सिद्धान्तात्। ३. शुक्तिकायां रजतमितिज्ञानं रजताध्यवसायि, न च रजते प्रमाणम्। ४. शुक्ले शङ्खे जायमानं पीताकारज्ञानं शङ्खादुत्पन्नं शङ्खाकारमथ च शङ्खाध्यवसायि, न च प्रमाणम्। ५. कार्यं ज्ञानं तन्निमित्तकारणं भवति वेद्यम्। ६. चक्षुरादिना। ७. उद्धृतमिदम्—अष्टश० अष्टसह० पृ० २३४।

1. मास योग० ख०। 2. क०, ग० प्रतौ 'तत्र' पदं नास्ति। 3. पिताकार० क०। 4. सकलवेदक० ग०। 5. धीर्नीलपीतसु० ख०, ग०। 6. समा……क०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ ५. तदेवं बहिरर्थाख्यद्वितीयरहितत्वादद्वैतमनुभवसिद्धविज्ञानमात्रमेव व्यवतिष्ठत इति ।

[उत्तरपक्षः]

§ ६. तदेतत् विज्ञानाद्वैतं प्रत्यक्षविरुद्धम्; [१]विज्ञानरूप अन्तरर्थवद् बहिरर्थस्यापि नीलादेः परमार्थस्य प्रत्यक्षेणोपलक्षणात् । भ्रान्तं तत्प्रत्यक्षमिति चेत्; न, बाधकाभावात् । उक्त एव वेद्यवेदकलक्षणाभावो बाधक इति चेत्, तावदेवं वदता योगाचारेण विज्ञानानां क्षणिकत्वमनन्यवेद्यत्वं नानासंतानत्वमनुमानेनैव व्यवस्थापनीयम्, स्वसंवेदनात्तदसिद्धेः; संविदां क्षणिकत्वेनाऽनन्यवेद्यत्वेन नानासंतानत्वेन नित्यत्वेन च सर्ववेद्यत्वेनैकत्वेन[1] परमब्रह्मणा ज्ञानवादिना इव[2] स्वसंवेदनाभावात् । अन्यथा ततो[२] ब्रह्मसिद्धेरपि दुर्निवारत्वात् । ततः क्षणिकत्वादिव्य[3]वस्थापनमनुमानेनैवास्तु । तथा च क्षणिकत्वादौ कथंचिद्वेद्यलक्षणं यदि व्यवतिष्ठेत् तदा प्रकृतसंविदां क्षणिकत्वादिसाधनं[4] लैङ्गिकज्ञानेन कृतं स्यान्नान्यथा ।

§ ७. न चानुक्तदोषं वेद्यलक्षणमस्ति, विज्ञानवादिना तज्जन्मादेरनैकान्तिकत्वदोषवचनात् । संवित्क्षणिकत्वादावनुमानवेदनस्य[5] तत्संभवे[३] नान्यत्र बहिरर्थे तदसंभवोऽभिधेयः[6] सर्वथा विशेषाभावात् ।

§ ८. अत्रायं प्रयोगः—विमत्यधिकरणभावापन्नं ज्ञानं साक्षात्परम्परया वा स्वरूपव्यतिरिक्तार्थालम्बनम्; ग्राह्यग्राहकाकारत्वात्; संतानान्तराद्यनुमानवत् । विप्लवज्ञानग्राह्यग्राहकाकारित्वेन[7] व्यभिचार इति चेत्; न[8]; संतानान्तरादिसाधनस्यापि व्यभिचारप्रसंगात् । न हि व्यापारव्याहारभे(द)निर्भासो[9] विप्लुतो नास्ति, येनाव्यभिचारिहेतुः स्यात् । यदि जाग्रद्दशाभाविसत्याभिमतव्यापारादिहेतुरव्यभिचारी स्यात्[10] तर्हि [11]तथाविधग्राह्यग्राहकाकारकत्व[12]हेतुरप्यव्यभिचारी भवेत्, तथैव विवक्षितत्वात् ।

§ ९. अथ सत्याभिमतज्ञानेन वासनाभेदो गम्यत[13] इति चेत्; तदन्यत्रापि समानम् । यथैव हि जाग्रद्दशायां बहिरर्थवासनाया दृढतमत्वात् तदाकारज्ञानस्य सत्यत्वाभिमानः; स्वप्नादिदशायां तु तदवासनाया दृढत्वाभावात्तद्वेदनस्यासत्यत्वाभिमानो लोकस्य न परमार्थतो बहिरर्थः सिद्ध्यतीति वासनाभेदो गम्यते, तथानुपप्लववदशायां संतानान्तरज्ञानस्य वासनाया दृढतमत्वात् सत्यताभिमानो, अन्यत्र तददार्ढ्यादसत्यताव्यवहार इति वासनाभेदो गम्यताम्, न तु संतानान्तरम् । [४]तदनभ्युपगमे स्वसंतानक्षणक्षयादिसिद्धिः कथमभ्युपगम्यते; ततः सुदूरमपि गत्वा किंचिद्वेदनं स्वेष्टतत्त्वावलम्बनमेषितव्यम्[14] । तस्मादयं मिथ्यादृष्टिः परप्रत्यायनाय शास्त्रं विदधानः परमार्थतः संविदानो[15] वचनं तत्त्वज्ञानं च प्रतिरुणद्धि इति न किंचिदेतत् । तदेवं वेद्यवेदकाकारत्वसाधनं[16] बहिरर्थवेदनस्य स्वरूपव्यतिरिक्तालम्बनत्वं साधयतीति बाधकबाधनात्[17] न बाधको वेद्यवेदकलक्षणाभावः ।

---

१. बहिरर्थग्राहि । २. स्वसंवेदनात् । ३. वेद्यवेदकभावसंभवे । ४. सन्तानान्तराभ्युपगमे ।

1.–नैकैत्वेन क० । 2.—णा इव क० । 3.–कत्वव्य० क० । 4.–कत्वसा० क० । 5.—दौ कथंचिद् वेदनस्य ख० । 6. —संवोऽभि० ग० । 7.—कारत्वेन ख०, कारकत्वेन ग० । 8.—ग० प्रतौ 'न' पदं नास्ति । 9.—हारभेदो नि० क०, ख० । 10. रव्यभिचारित्वात्तर्हि क० । 11. तथाविद् क० । 12. कारत्व० ख० । 13. वासना गम्यते क० । 14. तत्त्वालम्बन ख०, ग० । 15. संविधानो वा वचनं क० । 16. कारत्व क० । 17.–तीति बाधनात् ख० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ १०. नन्वस्त्येव[1] बहिरर्थप्रत्यक्षस्य बाधकम्, नीलतज्ज्ञानयोरभेदः[2] सहोपलम्भनियमात्[1], द्विचन्द्रवत्, इत्यनुमानस्य तद्बाधकत्वादिति चेत्; न; हेतोर्विरुद्धत्वात्। [3]यौगपद्यार्थे सहशब्दे तन्नियमस्याभेदविरुद्धे नाना(त्वे[2])[4]भावात्। अभेदेऽपि चन्द्रद्वितये भाव इति चेत्; न; तत्रापि यथा प्रतिभासं भेदभावात्[5]। तथा तत्त्वमभेदोऽपि[6] इति चेत्; न, यथातत्त्वं सहोपलम्भस्यापि अभावात् एवं दृष्टान्तोऽपि साध्यसाधनविकलः स्यात्। तन्मात्रस्य[3] हेतुत्वे तस्य भेदमात्र एव भावाद्विरुद्ध एव हेतुः स्यात्। तथा—असिद्धश्चायं हेतुः; यतो नर्तक्याद्येकार्थसंगतदृष्टयः परचित्तविदो[7] वा नावश्यं तद्बुद्धिं तदर्थं वा संविदन्तीति हेतोरसिद्धिः, नियमस्यासिद्धेः। नर्तकीरूपस्यापि बहुत्वान्न तन्नियमासिद्धिरिति चेत्; न; तद्रूपस्यैकत्वात्। तत्र सर्वेषां सभासमवायिनां[4] एकवाक्यताप्रतिपत्तेः। व्यामोहादेव कुतश्चित्तत्र तेषामेकवाक्यत्वं वस्तुतो नानैव [5]तद्रूपमिति चेत्, [6]कोशपानादेतत्प्रत्येतव्यं न प्रमाणतः कुतश्चिदपि तदभावात्।

§ ११. अथ **"सर्वे प्रत्ययाः निरालम्बनाः प्रत्ययत्वात् स्वप्नप्रत्ययवत्"** [प्र० वार्तिकालं० पृ० ३५९] इत्यनुमानं प्रकृतबाधकमिति चेत्; न; प्रकृतसाध्यसाधनप्रत्यययोः स्वार्थालम्बनत्वाभावेन हेतोर्विज्ञानमात्रसिद्धिः, हेतुसाध्ययोरभावात्। अथार्थवत्त्वे, ताभ्यामेव हेतोर्व्यभिचारात्। तदुक्तं भगवद्भिः स्वामिभिः—

> **"अनर्थिका साधनसाध्यधीश्चेद्विज्ञानमात्रस्य न हेतुसिद्धिः।**
> **अथार्थवत्त्वं व्यभिचारदोषो न योगिगम्यं परवादिसिद्धम्॥"**
> [युक्त्यनु० श्लो० १८] इति

§ १२. तदेवं सकलबाधकवैधुर्यादभ्रान्तेन प्रत्यक्षेण बहिरर्थसिद्धेर्दृष्टविरुद्धं विज्ञानाद्वैतशासनम्।

§ १३. तथेष्टविरुद्धं च, अनुमानाद्बहिरर्थसिद्धेः। तच्चेदमनुमानम्—'सन्ति बहिरर्थाः साधनदूषणप्रयोगात्' इति कथं पुनरतो भावधर्मिणो बहिरर्थस्य साधनम्, कथं च न स्यात्, अस्य सद्भावधर्मत्वे तद्वदसिद्धत्वापत्तेः; तदभावधर्मत्वे चातस्तदभावस्यैव सिद्धेर्विरुद्धत्वोपनिपातात्, तदुभयधर्मत्वे च व्यभिचारप्रसंगात् इति चेत्; न, प्रत्येकोभयधर्मविकल्पविकलस्यैवास्याभ्यनुज्ञानात्। कथमेवं तस्य बहिरर्थभावं प्रत्येव[8] लिङ्गत्वं न तदभावं प्रत्यपीति चेत्; न; तत्रैव[7] तस्याविनाभावनियमात्। धर्मिधर्मस्यापि कृतकत्वादेरनित्यत्वादौ[9] तत एव गमकत्वोपपत्तेः न धर्मिधर्मत्वमात्रेण, एकशाखाप्रभवत्वादावपि तदुपनिपातेनातिप्रसंगापत्तेः।

---

१. "सकृत्संवेद्यमानस्य नियमेन धिया सह।
विषयस्य ततोऽन्यत्वं केनाकारेण सिद्ध्यति॥" प्र० वा० ३।३८८

२. एकत्वेऽपि। ३. सहोपलम्भनियममात्रस्य। ४. सभ्यानामित्यर्थः। ५. नर्तकीरूपम्। ६. कोशपानं = सौगन्ध्यम्। ७. बहिरर्थसद्भाव एव। ८. अविनाभावनियमादेव। ९. पक्वानि एतानि फलानि एकशाखाप्रभवत्वात् उपयुक्तफलवदित्यत्र।

1. -स्त्यैव ग०। 2. नीलदानयो ग०। 3. युग क०, ग०। 4. नानात्वभावात् क०। 5. भेदवभावात् क०। भेद एव भावात् ख०। 6. भेदेऽपि क०, ख०। 7. विरोधावा० क०, ख०। 8. प्रत्येवं ग०। 9. -नित्यादौ ग०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ १४. तत्र[1] साधनं नीलादेः संवेदनत्वसमर्थनम्, दूषणं बहिरर्थ[1]त्वनिषेधनं तयोः प्रयोगः प्रकाशनम्। 'नीलादिः संवेदनादव्यतिरिक्तः तद्वेद्यत्वात्; तत्स्वरूपवत्' इत्यादिः 'न जडो नीलादिः प्रतिभास[2]मानत्वात् सुखादिवत्' इत्यादिश्च[3]।

§ १५. कथं पुनरस्य बहिरर्थाभावेऽनुपपत्तिरिति चेत्; अस्य[2] बहिरर्थविशेषत्वादेव। नहि तद[3]भावे तद्विशेषस्य संभवः, वृक्षाभावे शिंशपाभावस्यैव प्रतिपत्तेः। नासौ [4]तद्विशेष आरोपितरूपत्वादिति चेत्; न; ततः सर्वशक्तिविकलादनिष्टवदिष्टस्याप्यसिद्धेः। अनारोपितोऽप्ययं[5] बोध एव न बहिरर्थ इति चेत्; न, प्रतिपाद्यस्य तदभावात्। प्रतिपादकस्येति चेत्, कथं ततः[6] प्रतिपाद्यस्य प्रकृतार्थस्य प्रतिपत्तिः अन्यबोधादन्यस्य तदनुपपत्तेः। अन्यथा प्रत्यात्मं बुद्धिभेदकल्पनावैफल्योपनिपातात्। तस्मादर्थविशेष एवायमित्युपपन्नमेवातो बहिरर्थव्यवस्थानम्। ततः साधूक्तम्— 'इष्टविरुद्धं विज्ञानाद्वैतम्' इति।

[इति विज्ञानाद्वैतशासनपरीक्षा]

[चित्राद्वैतशासनपरीक्षा]

§ १६. एतेन चित्राद्वैतमपि प्रत्युक्तम्। तन्मतेऽपि बहिरर्थापह्नवात्। प्रत्यक्षानुमानाभ्यां बहिरर्थस्य च व्यवस्थापितत्वादित्यलं प्रसंगेन। सर्वथा अन्तरङ्गार्थैकान्तशासनस्य दृष्टेष्टविरुद्धत्वादसत्यत्वसिद्धेः।

प्रमाणाभावतः सर्वं विज्ञानाद्वैतिनां वचः।
भवेत्प्रलापमात्रत्वान्नावधेयं विपश्चिताम्॥
ज्ञानाद्वैतं न सत्यं स्याद्दृष्टेष्टाभ्यां विरोधतः।
न च तेन[4] प्रतिक्षेपः स्याद्वादस्येति निश्चितम्॥

[इति चित्राद्वैतशासनपरीक्षा]

---

१. 'साधनदूषणप्रयोगात्' इत्यत्र। २. साधनदूषणप्रयोगादित्यस्य हेतोः। ३. बहिरर्थाभावे। ४. बहिरर्थविशेषः। ५. साधनदूषणप्रयोगः। ६. प्रतिपादकबोधरूपात्।

1. –र्थनि० ख०। 2. माससमा० ग०। 3. त्यादेश्च ग०। 4. न तेन क०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[चार्वाकशासन-परीक्षा]

[पूर्वपक्षः]

§ १. अथानेकार्थवादिशासनानां मध्ये तावच्चार्वाकमतं दृष्टेष्टविरुद्धम् । इदं हि तेषामभिमतम्—इह तावन्न कश्चित्सर्वज्ञः सुगतादिषु संभवति ।

"सुगतो यदि सर्वज्ञः कपिलो नेति का प्रमा ।
तावुभौ यदि सर्वज्ञौ मतभेदः कथं तयोः ॥"

[तत्त्वसं० श्लो० ३१४९] [1]इति वचनात् ।

§ २. नाप्यागमस्तर्को वा प्रमाणभूतोऽस्ति परस्परविरोधादिदोषात्; ततः कथं धर्मो व्यवतिष्ठेत । तदुक्तम्—

"तर्कोऽप्रतिष्ठः श्रुतयो विभिन्नाः,
नासौ मुनिर्यस्य वचः प्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहायां,
महाजनो येन गतः स पन्थाः ॥"

[महाभारत] इति

§ ३. इह आप्तस्तु कश्चिद्देवतारूपो गुरुर्बृहस्पतिरेव प्रत्यक्षप्रसिद्धपृथिव्यादितत्त्वोपदेशात् । तथाहि—पृथिव्यप्तेजोवायव इति चत्वार्येव तत्त्वानि । कायाकारपरिणतेभ्यस्तेभ्यः[2] पिष्टोदकगुडधातकीसंयोगान्मदशक्तिवान् स्नायुलाबूदण्डाङ्गुष्ठाङ्गुलिप्रयत्नाच्छ्रवणरमणीयक्वणितवच्च[1] तदात्मकं चैतन्यं जायते । तच्च गर्भादिमरणपर्यन्तं 'जीव आत्मा' इत्यादि व्यपदेशभाक् प्रवर्तते । गर्भात् पूर्वकाले मरणादुत्तरकाले च तदभावः[2] ।

§ ४. ततः परलोकिनोऽभावः । परलोकिनोऽभावात् परलोकस्याप्यभावः । परलोकाभावे तल्लोकसुखानुभवनार्थमैहिकसुखविमुखा डिम्भका इव दम्भप्रलम्भनाधीनाः[3] शरीरार्थव्ययविधानेन बहुधा मुधावत् क्लेशमश्नुवते । तथैवोक्तम्—

"यावज्जीवेत् सुखं जीवेन्नास्ति मृत्योरगोचरः ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥
अग्निहोत्रं त्रयो वेदाः[3] त्रिदण्डं भस्मगुण्ठनम् ।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः[4] ॥
स्त्रीमुद्रां मकरध्वजस्य महतीं निर्वाणसंपत्करीं[4],
ये मोहादवधीरयन्ति कुधियो मिथ्यासुखान्वेषिणः ।

---

१. श्लोकोऽयं पूर्वपक्षे विद्यते । २. पृथिव्यादिभ्यः । ३. ऋक्यजुसामाख्याः । ४. उद्धृतमिदम्—सर्वदर्शनसं०, चार्वा० पृ० २,५ ।

1. प्रयत्नाभ्रम० क० । 2. काले तद्० क० । 3. –दिनाः क०, ग० । 4. जीवक०, क० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ते तेनैव निहत्य निर्दयतरं भस्मीकृता लुण्ठिताः,
केचित् पञ्चशिखीकृता हि जटिनः कापालिकाश्चापरे॥
[शृङ्गारशतक श्लो० ७९]

अन्यच्च—

"पयोधरभरालसाः स्मरविघूर्णिताद्रेक्षणाः,
क्वचिन्मलयपञ्चमोच्चरितगीतझङ्कारिणीः[1] ।
विहाय रमणीरमूरपरमोक्षसौख्यार्थिना—
महो जडिमडिण्डिमो विफलभण्डपाखण्डिनाम् ॥"
[ ] इति

[उत्तरपक्षः]

§ ५. तदेतच्चार्वाकमतं तावद् दृष्टविरुद्धम्, प्रत्यक्षेण पृथिव्यादीनां परस्परमुपादानोपादेयभावदर्शनात्, तेषां सर्वथा तत्त्वान्तरत्वस्य पक्षस्य [2]प्रत्यक्षविरोधसिद्धेः । तेषां परस्परमुपादानोपादेयभावेऽपि तत्त्वान्तरत्वे बीजादेरङ्कुरादेरपि तत्त्वान्तरत्वप्रसंगात् ।

§ ६. न च तेषां परस्परमुपादानोपादेयभावदर्शनमसिद्धम्, पृथिव्यात्मकचन्द्रकान्त-सूर्यकान्त-काष्ठविशेषेभ्यो[२] जलानलयोरुत्पत्तेः । प्रदीपजल[३]विशेषाभ्यां पृथ्वीरूपाञ्जन-मुक्ताफलयोः, पृथ्वीविशेषतालवृन्तादेर्वायोः साक्षाद्वीक्षणात्, अन्यथा दृष्टापलापप्रसंगात् ।

§ ७. तथा जीवो नास्तीत्यभिमतमपि दृष्टविरुद्धम् । सुखदुःखहर्षविषादाद्यनेकपरिणामात्मकस्यात्मतत्त्वस्य [3]स्वसंवेदनप्रत्यक्षेण निर्बाधमनुभवात् हेतुभिर्विनैव अस्तित्वस्य सिद्धेः ।

"तस्य हि हेतुर्वाच्यो यस्मिन्मोमुह्यते[4] मतिर्नृणाम् ।
न हि दर्पण आदेयः[5] करकङ्कणदर्शनाय बुधैः ॥"
[ ] इति वचनात्

§ ८. न च जीवस्य ज्ञानात्मनः स्वसंवेदनमसिद्धम्; ज्ञानस्य स्वसंविदितत्वे चाभावापत्तेर्ग्राहकाभावात् । ज्ञानान्तरेण ग्रहणे, तस्यापि तदनन्तरेण ग्रहणकल्पनायामनवस्थोपनिपातात् । तदकल्पनायां तथा वक्तुमशक्तेः । न चानुमानेन तद्ग्रहणम्, तदनुपगमात् प्रमाणसंख्याव्याघाताच्च । ततः स्वसंवेदनमेषितव्यम् । तत्र च स्वसंवेदनेन जीवस्य भोक्तृत्वासाधारणधर्मभूतः साक्षात्करणाद् दृष्टविरुद्धमिदं बार्हस्पत्यं मतम् ।

§ ९. नासिद्धं भोक्तृत्वस्यासाधारणत्वम्[6]; अचेतनस्य शरीरादेस्तदनुपपत्तेः । न ह्यचेतनस्य शरीरस्य भोक्तृत्वमुपपद्यते, शरीरस्य भोगाधिष्ठानत्वेन प्रसिद्धेः, अन्यथा मृतकस्यापि भोक्तृत्वप्रसंगात् । नापि करणग्रामस्य[४]; तस्य भोगोपभोगकरणत्वात् । न च शब्दादिविषयस्य; भोग्यत्वेन

१. उद्धृतमिदम्-यशस्तिलके उत्तरार्धे, पृ० २५२ । २. मणिभ्यः । ३. स्वातिनक्षत्रे वृष्टस्य शुक्तिमध्ये पतितस्य । ४. अनुमानानभ्युपगमात् । ५. इन्द्रियसमूहस्य ।

1. –झङ्कारिणः क० । 2. –त्वस्य परोक्षस्य प्रत्य० ख० । –त्वस्य परेष्टस्य प्रत्य० ग० । 3. –य संवे० क० । 4. –मन्नो० क० । 5. –णमादेयः क० । 6. –पि साधा० क०, ख० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्य प्रतीतेः। ततो भोक्तृत्वमात्मन्येवेति तदपलापिनो लोकायतिकस्य भोक्तृत्वं क्वापि न व्यवस्थामास्तिघ्नुवीत।[1]

§ १०. ननु पृथिव्यादिसमुदयशरीरकार्यान्वयिनि गर्भादिमरणपर्यन्ते चैतन्ये सर्वचेतनाविशेषव्यापिनि भोक्तृत्वं संभवति, शरीरादिविलक्षणत्वात्तस्येति चेत्; तदेवात्मद्रव्यमस्तु, जन्मनः पूर्वं मरणादूर्ध्वमपि तस्य सद्भावोपपत्तेः। विवादापन्नं चैतन्यमनाद्यनन्तं पृथिव्यादिसमुदयशरीरेन्द्रियविषयेभ्योऽत्यन्तवैलक्षण्यस्यान्यथानुपपत्तेः। न हि तत्कार्यं ततोऽत्यन्तविलक्षणमस्ति, रूपादिसमन्वयात्। चैतन्यस्यापि सत्त्वादिसमन्वयान्नात्यन्तविलक्षणत्वमिति चेत्; न; तत्त्वभेदेऽपि तस्य¹ भावात् पृथिव्यादीनामभेदापत्तेः। पृथिव्यादितत्त्वभेदानामेकविकारिसमन्वयाभावाद्भेद एव केषांचित्² प्रागभावादिभेदवत्; किमिदानीं चैतन्यभूतयोरेकविकारिसमन्वयोऽस्ति येन तत्त्वान्तरत्वेन भेदो न स्यात्, तस्मादेकविकारिसमन्वयासत्त्वं वैलक्षण्यम्, तदेव च तत्त्वान्तरत्वमित्यनाद्यनन्ततां[2] चैतन्यस्य साधयतीत्यनाद्यनन्तत्वेन प्रसिद्धः सोऽयमात्मा हर्षविषादाद्यनेकाकारविवर्तः प्रत्यात्मवेदनीयः प्रतिशरीरं भेदाभेदात्मकोऽप्रत्याख्यानार्हः प्रतिक्षिपन्तमात्मानं प्रतिबोधयतीति कृतं प्रयासेन। ततश्चार्वाकमतं दृष्टविरुद्धमिति सिद्धम्।

§ ११. एतेन [3]तदिष्टविरुद्धं च सिद्धम्, अनाद्यनन्तस्यात्मनः साधितत्वात्, प्रतिषेधगौणकल्पनादिभिस्तस्य साधयिष्यमाणत्वाच्च[4]। तदुक्तम्—

"प्रतिषेध-गौणकल्पन-शुद्धपदानेकसंमतिजिनोक्तैः³।
निर्बाधलक्षणार्थैर्लिङ्गैरपि भाव्यते भावः⁴॥"

[ ]

§ १२. तद्यथा—'नास्ति जीवः' इति प्रतिषेधवचनमेव जीवस्य मुख्यवृत्त्या अस्तित्वं सूचयति, निरूपाख्येषु⁵ विधिप्रतिषेधानुपपत्तेः। यथा—'नास्तीह घटः' इति प्रतिषेधो देशान्तरे घटास्तित्वं प्रकाशयति तथा स्वरूपादिचतुष्टयेन सत एव जीवस्य पररूपादिचतुष्टयेन नास्तित्वं घटते नान्यथा।

§ १३. ननु खरविषाण[5]दीनामत्यन्ताभावरूपाणामपि निषेधविषय[6]स्योपपत्तिरिति चेत्; न, गवादिमस्तके सत एव विषाणस्य खरादिमस्तके प्रतिषेधदर्शनात्। ततः सतः प्रतीतौ[7] प्रतिषेधसिद्धिरिति सुनिरूपितम्।

§ १४. तथा चित्रपुरुषादौ 'इदं [8]सजीवचित्रम्' इति गौणकल्पनं मुख्यवृत्त्या जीवास्तित्वं कथयति, यथा—'सिंहो माणवकः' इति माणवके सिंहत्वं विशिष्टजात्यादिपरिणतसिंहास्तित्वमिति। तस्माद्गौणकल्पनात् मुख्यसिद्धिरिति निरवद्यम्।

§ १५. तथा 'जीवः' इति शुद्धपदं मुख्यवृत्त्या, स्वार्थवत्, शुद्धपदत्वात्, प्रमाणपदवत्। ततः शुद्धपदाभिधेयत्वात् 'अस्ति जीवः' इति च सिद्धम्।

§ १६. तथैवानेकविशिष्टजनसंमतत्वात्, आप्तप्रणीतत्वाच्च 'अस्ति जीवः' इति सुव्यवस्थितम्।

---

१. सत्त्वादिसमन्वयस्य। २. नैयायिकानाम्। ३. प्रतिषेधश्च गौणकल्पनं च शुद्धपदश्च अनेकसम्मतिश्च जिनोक्तिश्च तैः। ४. जीवः। ५. निरूपेषु तुच्छेषु।

1. –वित क०, ग०। 2. –नन्तरां चैत–क०, ख०। 3. –तदेष्ट क०। 4. –माणाच्च क०। 5. –दिना ख०। 6. –विषयस्वोप–ग०। 7. प्रतीतो प्रति क०। 8. संजीव क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ १७. किं च भूतचैतन्ययोर्बहिरन्तर्मुखावभासयोः [1]बाल्यादि-रागादि-विरुद्धधर्माध्यासितयोर्द्रव्यान्तरभावेन[1] भिन्नप्रमाणग्राह्यत्वात् भेद एव। तयोर्देशभेदेनादर्शनादभेदे शरीराकारपरिणतावनि[2]वर्न[3]-पवनै[4]सख-पवनानामप्येकत्वप्रसंगात्। **"उपादानकारणसदृशं हि कार्यं भवति।"** [ ] इति वचनाद् धार[4]णेरणद्रवोष्णतारूपेण भूतसादृश्याभावात्, अमूर्तचैतन्यस्य मूर्तकार्यत्वायोगाच्च शरीराद्भिन्नमेव चैतन्यम्।

§ १८. तस्य[5] चाभिलाषो हि प्रत्यभिज्ञाने सति प्रादुर्भवति, प्रत्यभिज्ञानं च स्मरणे सति, स्मरणं च पूर्वानुभव[2] एव भवतीति पूर्वानुभवः सिद्धः। अन्यथा तदहर्जातबालकस्य स्तनादावभिलाषाऽभावप्रसंगात्। [6]मृतानां केषांचिद्रक्षोयक्षादिकुलेषु स्वयमुत्पन्नत्वेन कथयतां दर्शनात् केषांचिद्भवस्मृतेरुपलम्भाच्च परलोकोऽप्यस्ति। तदुक्तम्—

"तदहर्जस्तनेहातो रक्षो दृष्टेर्भवस्मृतेः[3]।
भूतानन्वयनात् सिद्धः प्रकृतिज्ञः सनातनः॥"

[ ] इति

§ १९. जननादिकारणाविशेषेऽपि सुखदुःखादिवैचित्र्यदर्शनात् पुण्यपापादिकमप्यस्त्येव। एवं प्रमाणप्रसिद्धे[4] परलोके परलोकपुण्यपापप्रद्वेषि बृहस्पतिमतं न सतां मनो मनागपि प्रीणयति[5], किंतु उपालम्भमेवार्हति। स चोक्तः स्वामिभिः—

'मद्याङ्गवद्भूतसमागमे ज्ञः शक्त्यन्तरव्यक्तिरदैवसृष्टिः।
इत्यात्मशिश्नोदरपुष्टितुष्टैर्निर्ह्रीभयैर्हा मृदवः प्रलब्धाः॥
दृष्टेऽविशिष्टे[6] जननादिहेतौ विशिष्टता का प्रतिसत्त्वमेषाम्।
स्वभावतः किं न परस्य सिद्धिरतावकानामपि हा प्रपातः॥
स्वच्छन्दवृत्तेर्जगतः स्वभावादुच्चैरनाचारपदेष्वदोषम्।
निर्घुष्य दीक्षा सममुक्तिमानास्त्वद्दृष्टिबाह्याः बत विभ्रमन्ति[7]॥

[युक्त्यनु० श्लो० ३५-३७] इति

ततो नायं बृहस्पतिराप्ततामात्मसात्करोति।

§ २०. यदुक्तम्—'सर्वज्ञो नास्ति' इत्यादि, तदपि प्रलापमात्रमेव; प्रत्यक्षतः सर्वज्ञस्य मुनेः, अनुमानस्यागमस्य च नास्तित्वव्यवस्थापनासंभवात्, तस्य[7] भावविषयताभ्युपगमात्[8]। यदि किंचित् प्रत्यक्षं तत्राप्रवर्तमानत्वादेव तदभावं व्यवस्थापयेत्, तदा पुरुषान्तरादि-प्रत्यक्षान्तराणामप्यभावं तदेव गमयेत्, तद्विषयाणां च [9]क्ष्मादीनामित्यतिप्रसंगःस्वयमिष्टस्य बृहस्पत्यादि-प्रत्यक्षस्यापि सविषयस्याभावसिद्धेः।

---

१. बाल्यादिभावो हि भौतिकशरीरगोचरः। २. जलम्। ३. अग्निः। ४. धारणं पृथिव्याः, ईरणं वाय्वोः, द्रवो जलस्य, उष्णता चाग्नेः। ५. जीवस्य। ६. तुलना—प्रमेयरत्न०। ७: प्रत्यक्षस्य।

1. –तराभावेन क०। 2. –नुभूत एव क०। 3. –स्कृवे क०। 4. प्रसिद्ध पर–क०, ख०। 5. प्रणयति क०, ख०। 6. दृष्टि क०। 7. इदं पद्यं ख 'प्रतौ नास्ति'। 8. विषयत्वाभ्यु० ख०। 9. -दिना० ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ २१. अथ प्रत्यक्षान्तरं स्वयमात्मानं व्यवस्थापयति पृथिव्यादि[1]स्वविषयं च तत्र प्रवर्तनादतो[2] न तदभावप्रसंग इति मतम्; तर्हि सर्वज्ञोऽपि स्वसंवेदनादात्मानं स्वर्गापूर्वादिविषयं च व्यवस्थापयति, इति कथं तदभावसिद्धिः, प्रमाणान्तरस्य[1] च तद्वचनस्य[3] [4]हेतुवादरूपस्याऽहेतुवादरूपस्य च स एव व्यवस्थापकः स्यादिति कुतस्तदभावसिद्धिः। सर्वज्ञः स्वपरव्यवस्थापकोऽस्तीत्यत्र किं प्रमाणमिति चेत्; स्वप्रत्यक्षैकप्रमाणवादिनः प्रत्यक्षान्तरं स्वपरविषयमस्तीत्यत्र किं प्रमाणम्, तथा प्रसिद्धिरन्यत्रापि, इति न प्रत्यक्षं तदभावावेदकम्, अतिप्रसंगस्य दुःपरिहरत्वात्।

§ २२. किं च, सर्वज्ञत्वाभावः प्रत्यक्षेण क्वचित् कदाचित् कस्यचिद् व्यवस्थाप्यते, सर्वत्र सर्वदा सर्वस्य वा ? तत्राद्यपक्षे परस्येष्टापादनम्।[3] द्वितीयपक्षे सर्वत्र सर्वदा सर्वस्य सर्वज्ञत्वाभावं प्रत्यक्षतः संविदन् स्वयं सर्वज्ञः स्यात्। तथा सति व्याहतमेतत् सर्वज्ञाभाववचनं चार्वाकस्य।

§ २३. नाप्यनुमानं तदभावसाधकम्, तदनभ्युपगमात्[5] स्वयमनुमानं निराकुर्वन्ननुमानादेव सर्वज्ञाभावं साधयति इति कथमनुन्मत्तः।

§ २४. तदेवं बाधकाभावादस्ति सर्वज्ञः। स च स्याद्वादी भगवन्नर्हन्नेवान्ययोगव्यवच्छेदेन निश्चीयते, तस्यैव युक्तिशास्त्राविरुद्धवाक्यत्वात्[6]। अन्येषां न्यायागमविरुद्धभाषित्वात्। ततस्तदुक्तो[4] धर्मो मोक्षश्च व्यवतिष्ठते। तन्निराकरणे चार्वाकाणां [7]प्रमाणाभावस्य प्रतिपादितप्रायत्वात्। प्रलापमात्रस्य च प्रेक्षावतामनादरणीयत्वादिति स्थितं दृष्टेष्टविरुद्धत्वात् चार्वाकमतमसत्यमिति।

स्वपराविदिताध्यक्ष[8]चार्वाकाणां वचोऽखिलम्।
भवेत् प्रलापमात्रत्वान्नावधेयं विपश्चिताम्॥
न चार्वाकमतं सत्यं दृष्टादृष्टेष्टबाधतः।
न च तेन प्रतिक्षेपः स्याद्वाद(स्ये)ति[9] निश्चितम्॥

[इति चार्वाकशासन-परीक्षा]

१. अनुमानरूपस्य। २. सर्वज्ञस्य प्रमाणान्तरस्य च। ३. 'अस्मिन् काले अत्र कश्चित्सर्वज्ञो नास्ति' इत्यत्र विवादाभावात्। ४. स्याद्वादितीर्थंकरप्रणीतः।

1. –दिविष– क०। 2. प्रवर्तमानात् क०, ख०। 3. तद्वचस्य ख०। 4. हितवाद. ख०। 5. तदभ्युप– क०। 6.–वाक्त्वात् ख०, ग०। 7.–माणभाव– क०, ख०। 8. विधिताध्यक्षाणां चा– क०, ख०। 9. –दश्चेति क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[बौद्धशासन-परीक्षा]

§ १. तथा ताथागतशासनमपि दृष्टेष्टविरुद्धम्। एवं हि सर्वभावानां क्षणभङ्गसंगममेवाङ्गशृङ्गारमङ्गीकुर्वाणास्ताथागताः संगिरन्ते—रूपादिपञ्चस्कन्धा एव तत्त्वानि। रूपरसगन्धस्पर्शपरमाणवः सजातीयविजातीयव्यावृत्ताः परस्पराऽसंबद्धा[1] रूपस्कन्धाः। सुखदुःखादयो वेदनास्कन्धाः। सवि-[2]कल्पकनिर्विकल्पकज्ञानानि विज्ञानस्कन्धाः।

"जाति-क्रिया-गुण-द्रव्यसंज्ञा पञ्चैव कल्पनाः।
अश्वो याति सितो[3] घण्टिक[१] तदाख्येति[२] यथाक्रमम्[4]॥

[ ] इति

इत्येतत्कल्पनासहितं सविकल्पकम्, तद्रहितं निर्विकल्पकम्। तथा वृक्षादिनामानि संज्ञास्कन्धाः। ज्ञानपुण्यपापवासनाः संस्कारस्कन्धाः इति। रूपवेदनाविज्ञानसंज्ञासंस्कारा इति पञ्च स्कन्धाः।

§ २. तेषु च पूर्व-पूर्वचित्तविशेषप्रभवा उत्तरोत्तरचित्तक्षणा उपादानोपादेयरूपेण सजात्युत्तरक्षणं जनयन्तः[5] परस्परासंपृक्ता निरन्वयप्रतिक्षणविशरारवो निरंशाश्च भ्रान्तिवशात् ग्राह्य-ग्राहकसंवेदनाकारत्रयाक्रान्ता [6]विजातीयाऽव्यवधानलघूत्पत्ति[३]-सदृशापरापरोत्पत्तिविप्रलब्धबुद्धेः संतानरूपेण वर्तमाना आत्माभिधानं जनयन्ति। तत्रैकत्वप्रत्यभिज्ञानमपि लूनपुनर्जातनखकेशादौ पूर्वापरैकत्वाभावेऽपि दर्शनान्नित्यत्वसमर्थनाय नालमिति त्रिकालानुयाय्ये[7]कत्वरहिता एव[8] वर्तन्ते; किंतु ज्ञान-वैराग्यभावनातिशयवशादविद्यातृष्णाविगमे निःशक्तिकानामुत्तरोत्तरविज्ञानक्षणमजनयतां निरन्वयविनाशेन संतानोच्छित्तिर्मोक्षः। "प्रदीपनिर्वाणकल्पमात्मनिर्वाणम्" [ ] इति वचनात्। तदुक्तम्—

[9]"क्षणादूर्ध्वं न तिष्ठन्ति शरीरेन्द्रियबुद्धयः।
दीपार्चिरिव वर्तन्ते स्कन्धाः क्षणविलम्बिताः[10]॥"

[ ] इति।

§ ३. तस्य च मोक्षस्योपायः काषायचीवरपरिधानशिरस्तुण्डमुण्डनब्रह्मचर्यधारणादयः। तथैव दुःखसमुदय[४]निरोधमार्गणा[५] इति चत्वारः पदार्थाश्चतुरार्यसत्याभिधाना मुमुक्षुभिर्ज्ञातव्याः।

§ ४. तत्र सहज-शारीर-मानसागन्तुकानि दुःखानि। तत्र सहजं क्षुत्तृष्णा-मनोभूभयादिकम्। शारीरं वात-पित्त-पीनसानां वैषम्यसंभूतम्। मानसं धिक्कारावज्ञेच्छाविघातादिजनितम्। आगन्तुकं शीतवातातपाशनिपातादिजनितम्। एतद्दुःखविशिष्टाश्चित्तक्षणाः संसारिणां दुःखमित्यु-

---

१. घण्टावान्। २. तत्संज्ञकः। ३. आशूत्पत्ति। ४. समुदेति अस्मादिति समुदयः दुःखकारणमिति यावत्। ५. निर्वाणम्। ६. अष्टाङ्गिकः सम्यग्दृष्ट्यादिः। ७. कफ।

1. –सम्बन्धा क०। 2. सविकल्पनिर्विकल्पकज्ञा– क०, ख०। 3. पितो क०, ख०। 4. –ख्यो यथा– क०। तालाख्यो– ख०। 5. जनयतः क०, ख०। 6. –क्रान्तानि जातीया– क०, ख०। 7. यायैकत्व– क०। 8. रहितावर्तन्ते, क०, ख०। 9. दूद्ध्वं, ख०। 10. विलम्बिनः ग०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

च्यन्ते। तद्दुःखजननकर्मबन्धहेतुभूते अविद्यातृष्णे समुदयशब्देनोच्येते[1] तत्र वस्तुयाथात्म्याऽप्रतिपत्तिरविद्या। इष्टानिष्टेन्द्रियविषयप्राप्तिपरिहारवाञ्छा तृष्णा। निरोधो नाम अविद्यातृष्णाविनाशेन निरास्रवचित्तसंतानोत्पत्तिलक्षणः संतानोच्छित्तिलक्षणो वा मोक्षः। तथा[2] मोक्षहेतुभूता मार्गणा।

§ ५. सा च सम्यक्त्व-संज्ञा-संज्ञीवाक्कायकर्मान्तर्व्यायामाऽऽजीवस्थिति-समाधिलक्षणाष्टाङ्गः। तत्र सम्यक्त्वं पदार्थानां याथात्म्यदर्शनम्। संज्ञा वाचकः शब्दः संज्ञी वाच्योऽर्थः। वाक्कायकर्मणी वाक्कायव्यापारौ। अन्तर्व्यायामो वायुधारणा। आजीव[3]स्थितिरायुरवसानपर्यन्तं प्राणधारणा। समाधिर्नाम सर्वं दुःखम्, सर्वं क्षणिकम्, सर्वं निरात्मकं सर्वं शून्यमिति[4] सत्यभावना। तस्याः प्रकर्षादविद्यातृष्णाविगमे निरास्रवचित्तक्षणाः सकलपदार्थावभासकाः समुत्पद्यन्ते। तद्योगिप्रत्यक्षम्। स च योगी[5] यावदायुस्तावत्कालमुपासकानां धर्ममुपदेश्य आयुरवसाने प्रदीपनिर्वाणकल्पमात्मनिर्वाणं प्राप्नोति उत्तरचित्तस्योत्पत्तेरभावादिति। तदप्युक्तम्—

"दीपो यथा निर्वृत्तिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्[6]।
दिशं न कांचिद्विदिशं न कांचित् स्नेहक्षयात्केवलमेति शान्तिम्॥
जीवस्तथा[7] निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्।
दिशं न कांचित् विदिशं न कांचित् मोहक्षयात् केवलमेति शान्तिम्॥"

[सौन्दरनन्द० १६।२८,२९] इति

[उत्तरपक्षः]

§ ६. तदेतत्सौगतमतं तावत् दृष्टविरुद्धम्। सौगताभिमतस्य निरन्वयविनाशिपरमाणुमात्रलक्षणस्वलक्षणस्य स्थूलस्थिरसाधारणाकारावभासिना प्रत्यक्षेण विरुद्धत्वात्। नहि प्रत्यक्षे सूक्ष्मक्षणिकासाधारणरूपाः परमाणवः प्रतिभासन्ते, स्थूलस्थिरसाधारणाकारात्मनामेव घटादीनां प्रतिभासनात्।

§ ७ ननु परमाण्वेवात्यासन्नासंसृष्टेषु दृष्टौ प्रतिभासमानेषु कुत[8]श्चिद्विभ्रमनिमित्तादात्मनि परत्र चासन्तमेव स्थूलाद्याकारं दर्शयन्तो [3]संवृतिः तान् संवृणोति केशादिभ्रान्तिवदिति चेत्; नैवम्; बहिरन्तश्च प्रत्यक्षस्य भ्रान्तत्वापत्तेः, तस्य अभ्रान्तत्वकल्पनापोढत्वाभावप्रसंगात्, **"प्रत्यक्षं कल्पनापोढमभ्रान्तम्"** [न्यायवि०१।४] इति लक्षणस्याऽसंभवदोषानुषंगात्।

§ ८ ननु नैष दोषः, परमाणुप्रत्यक्षस्य तल्लक्षणसंभवादिति चेत्; न; परमाणूनां जातुचिदध्यक्षबुद्धावप्रतिभासनात्। न हि कश्चिल्लौकिकः परीक्षको वा देशकालविप्रकृष्टार्थवत् परमाणून् साक्षात्प्रत्येति, अन्यथा प्रतीत्यपलापप्रसंगात्। त इमे परमाणवः प्रत्यक्षबुद्धावात्मानं न समर्पयन्ति प्रत्यक्षतां च स्वीकर्तुमिच्छन्तीत्यमूल्यदानक्रयिणः[4]।

१. तन्मते हि—सम्यग्दृष्टिः, सम्यक्संकल्पः, सम्यग्वाक्, सम्यग्व्यायामः, सम्यगाजीवः, सम्यक्प्रयत्नः, सम्यक्स्मृतिः, सम्यग्समाधिश्चेत्यष्टौ। २. भावनायाः। ३. कल्पना। ४. मूल्यं दातुं न प्रभवन्ति अथ च प्रत्यक्षतामिच्छति।

1. नोच्यते क०। 2. तदा क०, ख०। 3. अजीव क०, ख०। 4. –त्मकं शून्यम् क०। 5. योगि क०, ख०। 6. –रिक्षम् क०, ख। 7. जिनस्तथा क०। 8. –माने कुत– क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ ९. न च परमाणवः प्रत्यक्षा भवितुमर्हन्ति, तत्साक्षात्करणे प्रमाणाभावात् । निर्विकल्पकं प्रत्यक्षमस्तीति चेत्; न; तस्याव्यवसायात्मकस्याप्रामाण्यात्, अविसंवादवैकल्यात् । तथा हि-यदविसंवादविकलं न तत्प्रमाणं, यथा अज्ञस्य विषदर्शनम्, तद्विकलं च सौगतपरिकल्पितं दर्शनम् । अविसंवादो हीत्थं [1]गेयमित्थं चित्रमित्यभिसन्धिकरणमेव । **"अभिप्रायनिवेदनादविसंवादनम्"** [प्र० वा० १।३][1] इति वचनात् । न च तन्निवेदनमव्यवसायस्य, अज्ञविषदर्शनस्यापि तत्प्रसंगात् ।

§ १०. अव्यवसायस्यापि दर्शनस्य व्यवसायजननात्त[2]न्निवेदनमिति चेत्; न; व्यवसायस्यैवासंभवात्, कुतश्चिदपि तत्स्वरूपस्याव्यवस्थितेः । विकल्पस्वरूपस्य स्वसंवेदनेन व्यवस्थापनेऽपि तस्य विकल्पान्तरापेक्षत्वप्रसंगात्, नीलादिस्वलक्षणदर्शनवत् ।

§ ११. यदि स्वसंवेदनं निश्चयस्वरूपं निश्चयनिरपेक्षतया परिनिष्ठा[2]पयेत् तदा वस्तुदर्शनमपि स्वलक्षणम्, विशेषाभावात्, तथा च किं निश्चयापेक्षया ? वस्तुदर्शनस्य निश्चयापेक्षायां वा निश्चयस्वरूपसंवेदनस्यापि निश्चयान्तरापेक्षणादनवस्था स्यात् । विकल्पस्य[3]विकल्पान्तरेण व्यवस्थापनेऽपि तस्यापि तदन्तरेण व्यवस्थेति तदवस्थैवानवस्था । ततो व्यवसाय एव न संभवति यतस्तज्जननात् प्रत्यक्षं प्रामाण्यमुपढौकेत ।

§ १२. यथा कथंचिद् व्यवसायस्य संभवे वा न तज्जननं संभवति अव्यवसायाद् व्यवसायस्य गर्दभादश्वस्येवानुत्पत्तेः । अभिलापशून्यादप्यध्यक्षाद् व्यवसायकल्पनायां स्वलक्षणं किं नाध्यवसायं जनयेत् स्वयमभिलापशून्यमपि, प्रत्यक्षमध्यवसायस्य हेतुर्न पुनः रूपादिरिति कथं सुनिरूपिताभिधानम् ।

§ १३. यदि पुनरविकल्पकादपि प्रत्यक्षाद्विकल्पात्मनोऽध्यवसायस्योत्पत्तिः प्रदीपादेः कज्जलादिवत्; विजातीयादपि कारणात् कार्यस्योत्पत्तिदर्शनादिति मतम्; तदा [3]तादृशोऽर्थाद्विकल्पात्मनः प्रत्यक्षस्योत्पत्तिरस्तु तत एव ।

§ १४. [4]जातिद्रव्यगुणक्रियापरिभाषाकल्पनारहितादर्थात् कथं जात्यादिकल्पनात्मकं प्रत्यक्षं स्यादिति चेत्; प्रत्यक्षात्तद्रहिताद्विकल्पः कथं जात्यादिकल्पनात्मकः स्यादिति समानः पर्यनुयोगः[5] । विकल्पस्य जात्यादिविषयत्वाददोषः इति चेत्; न; प्रत्यक्षवत् तस्य[4] जात्यादिविषयत्वविरोधात्; तत[5] एव तस्य वस्तुनोऽप्युत्पत्तिप्रसक्तेश्चेति व्यवसायहेतुत्वमनुपपन्नमेव ।

§ १५. अथ व्यवसायवासनोन्मीलनेन अव्यवसायस्यापि व्यवसायहेतुत्वं दर्शनस्येति चेत्; न; तद्वदर्थस्यैव तद्धेतुत्वप्रसंगेन अन्तर्गडुनो दर्शनस्याऽकल्पनापत्तेः । व्यवसायहेतुत्वेन चाविसंवादित्वमौपचारिकमेव दर्शनस्य स्यात्, मुख्यतः संनिपत्याऽभिप्रायनिवेदनेन व्यवसायस्यैव तदुपपत्तेः ।

---

१. "प्रमाणमविसंवादिज्ञानमर्थक्रियास्थितिः ।
अविसंवादनं शाब्देऽप्यभिप्रायनिवेदनात् ॥" प्र० वा० १।३

२. व्यवस्थापयेत् । ३. शब्दरहितात् । ४. निर्विकल्पस्य । ५. प्रत्यक्षात् ।

1. –हितं ज्ञेयं क० । 2.–नात्तं निवेदमिति ख०, –जनमिति ग० । 3. इति पदं 'ग' प्रतौ नास्ति । । 4. एव तद्वज्जाद्व– क०, ख० । 5. पर्यनियोगः क०, ख० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न च ततस्तस्य प्रामाण्यम्; सन्निकर्षादावपि तत्प्रसंगात्। ततो युक्तमविसंवादवकल्यात् दर्शनमप्रमाणमिति। तदुक्तम्—

"[1]विषदर्शनवत्सर्वमज्ञस्याकल्पनात्मकम्।
दर्शनं न प्रमाणं स्यादविसंवादहानितः॥"

[सिद्धिविनि० १।२४] इति

§ १६. प्रामाण्याभावे च दूरतः प्रत्यक्षत्वम्, तस्य[1] तद्विशेषत्वेन तदभावेऽनुपपत्तेः। अतः प्रत्यक्षाभावान्न परमाणूनां प्रतिभासने प्रत्यक्षं प्रभवति।

§ १७. नाप्यनुमानम्; तस्य [2]लिङ्गदर्शनपूर्वकस्य प्रत्यक्षा[3]भावेऽनुपपत्तेः। नाप्यागमः वाचां वस्तुविषयत्वानिष्टेः। एवं सकलप्रमाणाभावात् कथमर्थप्रमितिः स्यात्, तदभावे परोदितपञ्चस्कन्धरूपाशेष[5]प्रमेयानुपपत्तिः। तथा च सकलं जगच्छून्यमेवेति स्याद्वादविद्वेषिनां सौगतानां महदनिष्टमुपनिपतति। तदुक्तं स्वामिसमन्तभद्रपादैः—

"प्रत्यक्षबुद्धिः क्रमते न यत्र तल्लिङ्गिगम्यं न तदर्थलिङ्गम्।
वाचो न वा तद्विषयेण योगः का तद्गतिः कष्टमश्रुण्वतां ते[3]॥"

[युक्त्यनु० श्लो० २२] इति

§ १८. ततः[6] प्राक्परमाणवः[7] प्रतिभासन्त इति परेषां प्रतिज्ञा पोप्लूयते, तथा पश्चात् संवृत्या स्थूलाद्याकाराः प्रतीयन्ते इति प्रतिज्ञापि। प्रागपि प्रत्यक्षेण नीलादिवत् स्थूलाद्याकाराणां दर्शनात् नीलविकल्पवत् स्थूलादिविकल्पानां च प्रतीतेः।

§ १९. तस्मादिन्द्रियबुद्धयोऽपि स्वलक्षणविषया मा भूवन् केवलं स्थूलाद्याकारान् पश्येयुः, अदृष्टे विकल्पायोगात्, [8]अतिप्रसंगाच्च।

§ २०. यथैव हि नीले पीतादीनामदृष्टत्वान्न तद्विकल्पोत्पत्तिः, नीलस्य दृष्टत्वान्नील-विकल्पस्यैवोत्पत्तेः[9], तथैव स्थूलादीनपश्यतः तद्विकल्पोत्पत्तिर्मा भूत्; स्वलक्षणदर्शनात् स्वलक्षणविकल्पोत्पत्तिरेवास्तु।

§ २१. न चैवम्, स्थूलाद्याकारेष्वेव विकल्पोत्पत्तेः। यदि पुनः स्थूलाद्याकाराणामदर्शनेऽपि तदनादिवासनावशादेव तद्विकल्पोत्पत्तिरुररीक्रियते तदा नीलादिरूपादर्शनेऽपि तद्वासनासामर्थ्यादेव नीलादिविकल्पोत्पत्तिः[6]। ततो[7] नीलादिरूपव्यवस्था मा भूत्। तद्वत्सुखादिव्यवस्थितिरपि कुतः संभाव्येत्। स्वसंवेदनव्यवस्था च तन्निश्चयोत्पत्तेः दुर्घटैव। तदनुत्पत्तेः सुतरां तदव्यवस्था स्वर्गप्रापणशक्त्यादिवद् वेद्याकारविवेकवद्वा। **"स्वरूपस्य स्वतो गतिः"** [प्र० वा० १।५]

---

१. प्रत्यक्षत्वस्य। २. प्रामाण्याभावे। ३. अर्हंत इष्टमित्यध्याहारः, तेन ते इष्टमश्रुण्वतामिति सम्बन्धः— आ, टि०। ४. स्थूलादिविकल्पोत्पत्तिः। ५. स्थूलादि। ६. स्यादिति। ७. नीलादिविकल्पोत्पत्त्यन्यथानुपपत्तेः।

1. एष क०, ख०। 2. लिङ्गादर्शं० क०। 3. प्रत्यक्षभावे क०। 4. अनुपपत्तिः क०, ख०। 5. —रूपाः शेष— क०। 6. तत् क०, ख०। 7. परमाणतः क०, ख०। 8.—योगादपि प्र— क०, ख०। 9. दृष्टत्वान्नीलोत्पत्ति— क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्यपि तथा निश्चयानुत्पत्तौ न सिद्ध्येत्, ब्रह्माद्वैतादिवदिति सर्वं विप्लवते ।

§ २२. ततः कुतश्चिन्निश्चयात् नीलादिस्वभावव्यवस्थायां स्थूलादिनिश्चयात् वस्तुनि परमार्थतः स्थूलाद्याकारव्यवस्थितिरास्थेया[1] अन्यथा क्वचिदपि व्यवस्थानासिद्धेः ।

§ २३. ततो न तेषां सांवृतत्वम्, संवृते विकल्पात्मिकायाः प्रागेव [१]प्रत्यादिष्टत्वाच्चेति प्रागुक्तं शाक्यवाक्यमशेषतः प्रतिज्ञारूपं प्राज्ञैरवज्ञायते ।

§ २४. ननु [न] परमार्थाः[2] स्थूलाद्याकाराः बाधकसद्भावात् । तथा हि—स्थूलाकारोऽवयवी, साधारणाकारः सामान्यम् । तत्र चैकस्यावयविनोऽनेकेष्ववयवेषु[3] सामान्यस्यैकस्य अनेकव्यक्तिषु वृत्तिः परैरिष्टा, प्रत्याश्रयं किमेकदेशेन, सर्वात्मना वा स्यात् प्रकारान्तराभावात् । समवायः प्रकारान्तरमिति चेत्; न; अयुतसिद्धेषु वर्तते समवैति इत्यनयोरर्थभेदाभावात् । तत्रैकमनेकत्र वर्तमानं प्रत्यधिकरणं न तावदेकदेशेन, निःप्रदेशत्वात् । नापि सर्वात्मना, अवयव्यादिबहुत्वप्रसंगात्; यावन्तोऽवयवादयस्तावन्तोऽवयव्यादयः स्युः, तेषां प्रत्येकं सर्वात्मना वृत्तत्वात् ।

§ २५. अथ प्रदेशवत्त्वं मन्येत अवयव्यादीनां तत्रापि वृत्तिविकल्पोऽनवस्था च । तथा वावयव्यादि सर्वं तदेकमेव न स्यादिति वृत्तेर्दोषस्य बाधकस्य भावादिति चेत्; तदसत्, भेदैकान्तवादिनामेव[4] प्रतिपादितदोषोपनिपातात् । स्याद्वादिभिरपि—

"एकस्यानेकवृत्तिर्न भागाभावाद्बहूनि वा ।
भागित्वाद्वास्य नैकत्वं दोषो वृत्तेरनार्हते ॥"

[आप्तमी० श्लोक० ६२] इति

तान् प्रति तद्दोषप्रतिपादनात् ।

§ २६. नन्वेवं वृत्तेर्दोषः स्याद्वादिनां च प्रसज्यत इति चेत्; तर्हि नायं प्रसंगोऽनेकान्ते कथंचित्तादात्म्यात् वेद्यवेदकाकारज्ञानवत्[5] । यथैव हि ज्ञानस्य वेद्यवेदकाकाराभ्यां तादात्म्यम्, अशक्यविवेचनत्वात् 'किमेकदेशेन सर्वात्मना वा' इति विकल्पयोर्न विज्ञानस्य सावयवत्वं बहुत्वं वा [6]प्रसज्येत, अनवस्था वा, तथा अवयव्यादेरप्यवयवादिभ्यस्तादात्म्यमशक्यविवेचनत्वादेव नैकदेशेन प्रत्येकं सर्वात्मना[7] वा; यतस्ताथागतः सर्वथा भेद इव अवयवावयव्यादीनां कथंचित्तादात्म्येऽपि वृत्तिं दूषयेत् ।

§ २७. यदत्रान्यदप्युक्तम्—न परमार्थः स्थूलाकारः परमाणूनां संबन्धासिद्धेः तेषामेकदेशेन संबन्धे दिग्भागभेदादनुषट्केन युगपद्योगे षडंशतापत्तेः; सर्वात्मना संबन्धे प्रचयस्यैकपरमाणुमात्र-

---

१. प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः श्रा० टि० । २. नैयायिकान् प्रति वृत्तिविकल्पदोषस्य ।

1.—रप्यासेया- क० । 2. ननु परमा- क० । 3. -वयेषु क० । 4. -वेदिना क०, ख० । 5. वेद्यवेदनाकार-ग० । 6. प्रसज्यते ख०, ग० । 7. प्रत्येक असर्वा- क० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्वापत्तेरिति, तदपि दूषणं परमाणूनामनन्यथै[1]कान्तवादिनां[1] स्यान्न पुनः स्याद्वादिनाम्। यथैव हि नैयायिकादयः 'परमाणवो विविक्तावस्थावत् प्रचयावस्थायामपि परमाणुत्वं न त्यजन्ति' इति मन्यन्ते न तथा स्याद्वादिनो येन तद्दोषस्तेषामनुषज्येत; तैः परमाणूनां स्निग्धरूक्षाणामजघन्यगुणानां द्व्यधिकादिगुणानां विजातीयानां सजातीयानां च [2]सक्तुतोयवत् संतप्तजतुखण्डवत् कथंचित् स्कन्धाकारपरिणामात्मकस्य संबन्धस्याभ्युपगमात्।

[2]"लुक्खस्स[3] लुक्खेण दुवाहिएण,
णिद्धस्स णिद्धेण दुवाहिएण।
णिद्धस्स लुक्खेण हवेइ[4] वन्धो,
जहण्णवज्जे विसमे समे वा॥"

[ ] इति वचनात्।

§ २८. [3]परैरप्येवमभ्युपगमः कर्तव्यः, अन्यथा अर्थक्रियाविरोधात्, अणूनामन्योन्यमसंबन्धतो जलधारणाहरणाद्यर्थक्रियाकारित्वानुपपत्तेः। रज्जुवंशदण्डादीनामेकदेशापकर्षणे तदन्याकर्षणे चासंबन्धवादिनो न स्यात्। अस्ति चैतत् सर्वम्, विकल्पप्रतिभासिनः प्रत्यक्षदृष्टत्वसिद्धेः अदृष्टे विकल्पायोगात्, अन्यथातिप्रसंगस्योक्तप्रायत्वात्। असंबद्धपरमाणुमात्रग्राहिप्रत्यक्षादिप्रमाणाभावस्य प्रतिपादितत्वाच्च[5]। ततो जलाहरणाद्यर्थक्रियान्यथानुपपत्तेः संबन्धासिद्धः।[6]

§ २९. किं च, एवं वदतः चित्रज्ञाननिर्भासलवविशेषाणामेकदेशेन सर्वात्मनापि संबन्धासिद्धेः सकलनीलादिनिर्भासावयवव्याप्येकत्वं तत्र[7] न सिद्ध्येत्। तदवयवपृथक्त्वकल्पनायां चित्रैकज्ञानव्यवहारो मा भूत्; पृथग्वर्णान्तरविषयानेकसंतानैकैकक्षणवत्। तत्र प्रत्यासत्तिविशेषः कथंचिदैक्यात्कोऽपरः स्यात्; देशप्रत्यासत्तेः शीतवातादिभिः व्यभिचारात्; कालप्रत्यासत्तेरेकसमयवर्तिभिरशेषार्थैरनेकान्तात् भावप्रत्यासत्तेरेकार्थोद्भूतानेकपुरुषज्ञानैरनैकान्तिकत्वात्, द्रव्यप्रत्यासत्तिरेव पारिशेप्यात् संभाव्यते। सा चैकद्रव्यतादात्म्यलक्षणत्वात् प्रत्यासत्तिविशेष इति कथंचिदैक्यमेवैकत्वव्यवहारनिबन्धनं चित्रज्ञानस्य।

§ ३०. तदेवं प्रमाणप्रसिद्धचित्रज्ञानवत् सूक्ष्मस्थूलात्मनि जात्यन्तरे[4] स्याद्वादीष्टवस्तुनि वृत्तिदोषाद्यखिलदोषो नावकाशं[8] लभते। अत्रान्यत्र च सर्वत्र विरोधादिदूषणं चित्रज्ञानमेवापहस्तयतीति किं नश्चिन्तया। ततः स्याद्वादीनां[9] संमतः स्थूलाकारः परमार्थ एव सिद्धः। एतेन तदभिमतः साधारणाकारोऽपि परमार्थतया सिद्धः स्याद्वादिसंमतस्य सदृशपरिणामलक्षणस्य सामान्यस्याप्रतिक्षेपार्हत्वात्, अन्यथा शुक्तिकादे रजताद्यपेक्षया साधर्म्य[10]दर्शनस्याभावात्, कथं तन्निबन्धनस्तत्र

---

१. परमाणवः परमाणव एव न तु अन्यरूपा अवयविरूपा वा भवन्ति इत्येकान्तवादिनाम्।
२. रूक्षस्य रूक्षेण द्व्याधिकेन, स्निग्धस्य स्निग्धेन द्व्याधिकेन। स्निग्धस्य रूक्षेण भवति बन्धः, जघन्यवर्ज्ये विषमे समे वा॥ उद्धृतम्—सर्वा० पृ० ३०७। ३. बौद्धैरपि। ४. कथंचित् नित्यानित्यात्मनि।

1. -मनन्यतैकान्त-ग०। 2. जघन्यगुणानां विजातीयानां च सक्तु क०, ख०। 3. लक्ख क०, ख०। 4. उवेइ क०, ख०। 5. -पादित्वाच्च क०, ख०। 6. संबन्धः सिद्धः। 7. -वयव्याप्येतत्वं तत्र क०, ख०। 8. वावकाशं क०, ख०। 9. वादि स- ग०। 10. साधर्म- क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रूप्या[१]ध्यारोपः, यत इदं सूक्तं भवेत् ।

"शुक्तौ वा रजताकारो रूपसाधर्म्यदर्शनात् ॥"

[प्र० वा० १।४५] इति

§ ३१. न च साधर्म्यादपरं सामान्यमस्ति, तस्य नित्यव्यापिस्वभावस्य क्वचिदप्यप्रतिवेदनात् । तथा स्याद्वादिसंमतः[1] स्थिराकारः[2] परमार्थ एव, चित्रज्ञानस्यैकस्य युगपदनेकाकारव्यापित्ववत् क्रमेणाप्येकस्यात्मादेरनेकाकारव्यापित्वसिद्धेः । तथैवोक्तं भट्टाकलङ्कदेवैः—

"यथैकं भिन्नदेशार्थान् कुर्याद्व्याप्नोति वा सकृत् ।
तथैकं भिन्नकालार्थान् कुर्याद् व्याप्नोति वा क्रमात् ॥"

[लघी० श्लो० ३७] इति

पूर्वोत्तरक्षणानां सर्वथानिरन्वयत्वे[२] अर्थक्रियाविरोधाच्च । न हि क्षणक्षयैकान्तपक्षे अर्थक्रियोपपन्ना; बहिरन्तरर्थानां निरन्वयविनाशे कार्यस्य निर्हेतुकत्वापत्तेर्जन्मविरोधसिद्धेः ।

§ ३२. ननु पूर्वक्षणादुत्तरक्षणस्य प्रादुर्भावात् कुतो निष्कारणत्वं कार्यस्येति चेत्; न; [३]कार्यकालमप्राप्नुवतः कारणत्वानुपपत्तेः, चिरतरातीतवत् ।

§ ३३. ननु कार्यकालं प्राप्नुवतोऽपि न कारणत्वम्, अन्यथा सर्वस्य समानक्षणवर्तिनस्तत्कारणत्वप्रसंगात् । ततो यदन्वयव्यतिरेकानुविधायि कार्यं[3] तदेव तस्य कारणम् **"नाननुकृतान्वयव्यतिरेकं कारणम् ।"** [ ] इति वचनात् इति चेत्; न; क्षणक्षयैकान्ते अन्वयव्यतिरेकस्यैवाघटनात् ।

§ ३४. न खलु समर्थे कारणे [4]सत्यभावतः स्वयमेव पश्चादभवतस्तदन्वयव्यतिरेकानुविधानं नाम नित्यवत् । 'स्वदेशवत् स्वकाले सति समर्थे कारणे कार्यं जायते नासति' इत्येतावता क्षणिकपक्षे अन्वयव्यतिरेकानुविधाने नित्येऽपि [४]तत् स्यात्; स्वकालेऽनाद्यनन्ते सति समर्थे नित्ये स्वसमये कार्यस्योत्पत्तेरसत्यनुत्पत्तेश्च प्रतीयमानत्वात् ।

§ ३५. सर्वदा नित्ये समर्थे सति स्वकाल एव कार्यं भवत् कथं तदन्वयव्यतिरेकानुविधायीति चेत्; तर्हि कारणक्षणात्[5] पूर्वं पश्चाच्चानाद्यनन्ते तदभावेऽविशिष्टे[6] क्वचिदेव तदभावसमये भवत् कार्यं कथं तदनुविधायीति समानम् । नित्यस्य प्रतिक्षणमनेककार्यकारित्वे क्रमशोऽनेकस्वभावत्वसिद्धेः कथमेकत्वं स्यादिति चेत्; क्षणिकस्य कथमिति समः पर्यनुयोगः । स हि क्षणस्थितिरेकोऽपि भावोऽनेकस्वभावो विचित्रकार्यत्वात् नानार्थक्षणवत् ।

§ ३६. न हि कारणशक्तिभेदमन्तरेण कार्यनानात्वं युक्तं रूपादिज्ञानवत् । यथैव हि कर्कटिकादौ रूपादिज्ञानानि रूपादि[7]स्वभावभेदनिबन्धनानि तथा क्षणस्थितेरेकस्मात् प्रदीपादिक्षणात् वर्तिकादाहतैलशोषादिविचित्रकार्याणि शक्तिभेदनिमित्तकानि व्यवतिष्ठन्ते, अन्यथा रूपादेरपि नानात्वं न स्यात् ।

---

१. रूप्यम्—रजतम् । २. एकद्रव्यान्वयाभावे । ३. तुलना—अष्टश० अष्टस० पृ० ८७ । ४. अन्वयव्यतिरेकानुविधानम् ।

1. स्याद्वादादि क०, ख० । 2. स्थिराकारोऽपि ग० । 3. विधायि तदेवस्य- क०, ख० । 4. -भावतः क० । 5. -णक्षयात् क०, ख० । 6. -भावे विशिष्टे क० । 7. रूपादे स्व- क०, ख० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ ३७. ननु च शक्तिमतोऽर्थान्तरानर्थान्तरपक्षयोः[१]शक्तीनामघटनात्तासां[1] परमार्थसत्त्वाभावः; तर्हि रूपादीनामपि प्रतीतिसिद्धद्रव्यादर्थान्तरानर्थान्तरविकल्पयोरसंभवात् परमार्थसत्त्वाभावः स्यात्। स्याद्वादिभिश्चित्रज्ञानवत् जात्यन्तरस्य शक्तिमतोऽर्थस्योपगमाच्च नोक्तदोषानुषङ्गः।

§ ३८. अथ प्रत्यक्षबुद्धौ प्रतिभासमानत्वाद्रूपादयः परमार्थसन्तो न पुनस्तच्छक्तयस्तासामनुमानबुद्धौ प्रतिभासमानत्वात्; इत्यप्ययुक्तम्; क्षणक्षयस्वर्गप्रापणशक्त्यादीनामपरमार्थसत्त्वप्रसंगात्। ततो यथा क्षणिकस्य युगपदनेककार्यकारित्वेऽप्येकत्वाविरोधस्तथा अक्षणिकस्य क्रमशोऽनेककार्यकारित्वेऽपीत्यनवद्यं स्थिराकारोऽपि परमार्थ इति।

§ ३९. तदेवं सकलबाधकाभावादप्रतिक्षेपार्हाणामार्हताभिमतानां स्थिरस्थूलसाधारणाकाराणां[2] परमार्थत्वसिद्धेः[3] अभ्रान्तेन तद्ग्राहिप्रत्यक्षेण स्वलक्षणलक्षणतत्त्वस्य विरुद्धत्वं सिद्ध्यत्येव।

§ ४०. ननु नैष दोषः, सौगताभिमतस्वलक्षणतत्त्वस्य अवाच्यत्वादिति चेत्; तदसंगतम्; अवाच्यशब्देन स्वलक्षणतत्त्वस्य वाच्यत्वात् स्ववचनेनैव स्वप्रतिज्ञा[4]हानेर्दर्शनात्।

§ ४१. नन्ववाच्य[5]शब्देनापि न स्वलक्षणस्वरूपमुच्यते [२]तेनारोपितसामान्याकारस्यैवाभिधानादिति चेत्, व्याहतमेतत्। सामान्याख्यपररूपवाचिना अवाच्यशब्देन स्वलक्षणस्वरूपाभिधानस्य विरुद्धत्वात् नीलशब्देन पीताभिधानवत्। तदुक्तं युक्त्यनुशासने स्वामिभिः—

"अवाच्यमित्यत्र[6] च वाच्यभावादवाच्यमेवेत्ययथाप्रतिज्ञम्।
स्वरूपतश्चेत् पररूपवाचि स्वरूपवाचीति वचो विरुद्धम्।"

[युक्त्यनु० श्लो० २९] इति

§ ४२. ततो नावाच्यतैकान्तः श्रेयानिति कथमपि प्रत्यक्षविरोधो दुःशकः परिहर्तुम्। तस्मात् सुव्यवस्थितेयं [३]प्रतिज्ञा दृष्टविरुद्धं शाक्यशासनमिति।

§ ४३. तथा ताथागतशासनमिष्टविरुद्धम्। तदभिमतक्षणक्षयैकान्तविरुद्धस्य आत्मादीनां कथंचिन्नित्यत्वस्यानुमानेन साधनात्। तथा हि—यत् सत् तत्सर्वं कथंचिन्नित्यम्, सर्वथा क्षणिके क्रमयौगपद्याभ्यामर्थक्रियाविरोधात् सत्त्वानुपपत्तेः' इति। अत्र न तावद्धेतोरनैकान्तिकत्वम्; सर्वथा नित्यत्वे सत्त्वस्याभावात्, सर्वथा क्षणिकत्ववत्। तदभावश्च क्रमाक्रमानुपपत्तेः। तदनुपपत्तिश्च पूर्वापरस्वभावत्यागोपादानान्वितरूपाभावात्; सकृदनेकशक्त्यात्मकत्वाभावाच्च। न हि कूटस्थे पूर्वोत्तरस्वभावत्यागोपादाने स्तः; क्षणिके चान्वितं रूपमस्ति यतः क्रमः [7]कालकृतो देशकृतो वा स्यात्। नापि युगपदनेकस्वभावत्वं यतो यौगपद्यम्, कौटस्थ्यविरोधात्, सर्वथैकरूपत्वात् कूटस्थस्य। "एकरूपतया तु यस्त्रिकालव्यापी सः [8]कूटस्थः" [ ] इत्यभिधानात्, निरन्वयक्षणिकत्वव्याघाताच्च, तथा क्रमाक्रमानेकान्तात्मकस्यैव सिद्धेः। सहकारिक्रमाक्रमापेक्षया [४]तत्र क्रमयौगपद्यकल्पनापि न साधीयसी; स्वयं [५]तदपेक्षाक्रमेतरस्वभावत्वाभावे तदनुपपत्तेः।

---

१. भेदाभेदपक्षयोः। २. शब्देन। ३. बौद्धेन कृता यत् शाक्यशासनं दृष्टविरुद्धमिति। ४. नित्ये। ५. सहकार्यपेक्षा स्वयं तत्स्वभावस्यैव संभाव्यते।

1. –टनात्तानां पर– क०। 2. –लपाधारणाकारणां क०। 3. सिद्धिः क०, ख०। 4. –नैव प्रतिज्ञा. क०, ख०। 5. नन्वाच्य– क०, ख०। 6. —मित्यस्य ग०। 7. क्रम क०, ग०। 8. —तया तु यः कालव्यापि सकूटस्थः क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ ४४. तत्कार्याणां तदपेक्षा न पुनर्नित्यस्य क्षणिकस्य चेत्यपि न श्रेयः; तेषां तदकार्यत्वप्रसंगात् ।

§ ४५. तत्सहितेभ्यः सहकारिभ्यः कार्याणामुत्पत्तेः, अन्यथाऽनुत्पत्तेस्तत्कार्यत्वनिर्णयः इति चेत् तर्हि येन स्वभावेनैकेन सहकारिणा सहभावः तेनैव सर्वसहकारिणा यदि तस्य स्यात् तदैककार्यकरणे सर्वकार्यकरणात् क्रमकार्यानुत्पत्तिः । सहकार्यन्तराभावेऽपि च तत्सहभावात् सकृदेव सकलकार्योत्पत्तिः प्रसज्येत । स्वभावान्तरैः सहकार्यन्तरसहभावे तस्य क्रमाक्रमवृत्त्यनेकस्वभावत्वसिद्धेः कुतो नित्यमेकत्वस्वभावं[1] क्षणिकं वा[2] वस्तु क्रमयौगपद्ययोर्व्यापकं स्यात्, कथंचिन्नित्यस्यैव क्रमाक्रमानेकस्वभावस्य तद्व्यापकत्वप्रतीतेः ।

§ ४६. एतेन विपक्षे हेतोर्बाधकस्य व्यापकानुपलम्भस्य[1] व्यतिरेकनिश्चयः कथंचिन्नित्ये प्रत्यक्षप्रवृत्तेः प्रदर्शितः प्रत्येयः । ततः सत्वं[3] कथंचिन्नित्यमेव साधयतीति सिद्धं शौद्धोदनिशासनमिष्टविरुद्धमिति ।

§ ४७. तथा च शुभाशुभानुष्ठान-पुण्य-पाप-श्वभ्र-स्वर्गादि-परलोक--बन्ध--बन्धकारण-मोक्ष-मोक्षकारण-बन्धमोक्षफल-बद्ध[4]-मुक्तादिपरोक्षतत्कारणस्वरूपप्रतिपादकोऽपि बौद्धागमो न प्रमाणम्; दृष्टेष्टविरुद्धागमसमकर्तृकस्य तस्यातीन्द्रिये[5]ष्वतितरामप्रामाण्यापत्तेरिति[6] न बौद्धानां धर्मानुष्ठानं प्रतिष्ठामियर्ति । किं बहुना, बौद्धैर्यद्यदभिधीयते तत्सर्वमसदेव तदभिमतसर्वतत्त्वस्य शून्यत्वात् ।

§ ४८. तथा हि [2]विकल्पोऽभिलापसंबन्धार्थग्रहणरूपः परैरिष्टः । स च नास्त्येव । न हि तावद्विषयस्याभिलापेन तद्गतेनैव संबन्धः, तत्र तदभावात् । स्मरणोपनीतेन [7]संकेतकालप्रतिपन्नेनेति चेत्; न; स्मरणस्य निर्विकल्पकत्वे तद्विषयस्य स्वलक्षणत्वे न क्वचिदुपनयनानुपपत्तेः । व्यवसायरूपत्वे च तेनापि स्वविषयोऽभिलापसंबन्ध एव स्मर्त्तव्यः । तदभिलापोऽपि तथाविध एव तत्स्मरणेनेत्यनवस्थितिप्रसंगात् । स्मरणस्य तदनभिसंबन्ध[8]वस्तुवेदित्वेऽपि व्यवसायस्वभावत्वे प्रत्यक्षस्यापि तत्किं न स्यात्, '[9]स्वाभिधानविशेषापेक्षया एवार्था निश्चयैर्व्यवसीयन्ते' इत्येकान्तत्यागात् । नाम्नः स्वलक्षणस्यापि स्वाभिधानविशेषानपेक्षस्यैव व्यवसायवचनात् ।

§ ४९. एवमनवस्थादिदोषोपनिपातान्नामस्मरणाभावेन क्वचिद्विकल्पा न [10]सिद्ध्येत् । स्मरणोपनीतनामसंबद्धार्थग्रहणस्यैव[11] विकल्पत्वात्[12] । विकल्पाभावेन न[13] क्वचित्प्रत्यक्षम् । अकृतविकल्पेन प्रत्यक्षेण बहिरन्तर्वा गृहीतस्याप्यगृहीतकल्पत्वात् क्षणक्षयादिसंवेदनवत् । प्रत्यक्षाभावे न क्वचिदनुमानम् [14]प्रत्यक्षपूर्वकत्वात्तस्येति सकलप्रमाणाभावः । [3]तदभावे सकलप्रमेयाभावः, प्रमाणापाये प्रमेयव्यवस्थानुपपत्तेरिति सौगताभिमतं सर्वं तत्त्वं शून्यमेव स्यात् ।

---

१. क्रमाक्रमयोर्व्यापकयोरनुपलम्भः । २. "विकल्पो नाम संश्रयः" [प्र० वा० २।१२३] इत्यभिधानात् । ३. प्रमाणाभावे ।

1. –मेकस्व-, ग० । 2. भावा क० । 3. सत्त्वम् क०, ख० । 4. –मोक्षबद्ध- ख० । 5. –ष्वति- क०, ख० । 6. प्रामाण्योपपत्तेरि- क०, ख० । 7. –नीते सं. ख० । 8. संबद्ध- क०, ख० । 9. सामि –क०, ख० । 10. –कल्पः सिद्ध्येत् ग० । 11. संबन्धार्थ– ग० । 12. विकल्पात् क०, ख० । 13. 'न' ख प्रतौ नास्ति । 14. –मानप्रत्यक्षकत्वात् क०, ख० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§. ५० तथा च सौगतो हेयोपादेयोपायरहितोऽयमह्रीकः केवलं विक्रोशतीत्युपेक्षार्ह एवेति कृतमतिविस्तरेण, दृष्टेष्टविरुद्धत्वात्तन्मतस्यासत्यत्वसिद्धेः।

दृष्टेष्टेषु दृष्टेष्टविरोधात् सुगतोदितः।
परोक्षेषु तदेकत्वादागमो न प्रमाणताम्॥
विकल्पाभावतः सर्वहानेर्बौद्धवचोऽखिलम्।
भवेत्प्रलापमात्रत्वान्नावधेयं विपश्चिताम्॥
दृष्टेष्टाभ्यां विरुद्धत्वान्न सत्यं शाक्यशासनम्।
न च तेन प्रतिक्षेपः स्याद्वादस्येति[1] निश्चितम्॥

[इति बौद्धशासनपरीक्षा]

1. –दश्चेति –क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[सांख्यशासन-परीक्षा]

[पूर्वपक्षः]

§१. तथा सांख्यशासनमपिदृष्टेष्टविरुद्धम् । एवं हि [1]तावदाख्यान्ति सांख्याः—सर्वमिदं जगत्प्रधानमयम्;[१] प्रधानं च सत्त्वरजस्तमसां साम्यावस्थास्वरूपम् । तथा च तद्ग्रन्थाः—

"सत्त्वं लघुप्रकाशकमिष्टमवष्टम्भकं चलं च रजः ।
गुरुवरणकमेव तमः साम्यावस्था भवेत्प्रकृतिः ॥"

[सांख्यका० १३]

§ २. तत्र यदिष्टं प्रकाशकं लघु तत्सत्त्वमित्युच्यते । सत्त्वोदयात् प्रशस्ता एव परिणामा जायन्ते । यच्च चल[2]मवष्टम्भकं दारकं ग्राहकं वा तद्रज इत्युच्यते । रजस उदयाद्रागपरिणामा एव जायन्ते । यद्गुरु आवरणकमज्ञानहेतुभूतं तत्तम इति निरूप्यते । तमस उदयात् द्वेषादज्ञानपरिणामा एव जायन्ते । सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः ।

"प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः ।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि ॥"

[सांख्यका० २२]

§३. जगदुत्पादिका प्रकृतिः, 'प्रधानं बहुधानकम्' इति प्रकृतेरभिधानानि । ततः प्रकृतेर्महानुत्पद्यते । आसर्गप्रलयस्थायिनी बुद्धिर्महान् । ततो महतः सकाशादहंकार उत्पद्यते । 'अहं ज्ञाता[3], अहं सुखी, अहं दुःखी' इत्यादि प्रत्ययविषयः । ततोऽहंकाराद् गन्धरसरूपस्पर्शशब्दाः[4], पञ्चतन्मात्राः, स्पर्शन-रसन-घ्राण-चक्षु-श्रोत्राणि पञ्चबुद्धीन्द्रियाणि, वाक्-पाणि-पादपायू[२]पस्थानि[3] पञ्चकर्मेन्द्रियाणि, मनश्चेति षोडशगणाः समुत्पद्यन्ते । तेषु षोडशगणेषु[5] पञ्चतन्मात्रेभ्यः पञ्चभूतानि समुत्पद्यन्ते ।

§ ४. तद्यथा—गन्धरूपरसस्पर्शेभ्यः पृथिवी, रसरूपस्पर्शेभ्यो जलम्, रूपस्पर्शाभ्यां तेजः, स्पर्शाद्वायुः, शब्दादाकाशः समुत्पद्यत इति सृष्टिक्रमः । एतानि चतुर्विंशतितत्त्वानि । पञ्चविंशको जीवः । षड्विंशकः परम इति निरीश्वरसांख्याः । षड्विंशको महेश्वरः, सप्तविंशतिः परम इति सेश्वरसांख्याः । तेषु तत्त्वेषु—

"मूलप्रकृतिरविकृतिर्महादाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥"

[सांख्यका० ३]

---

१. प्रधानमिति प्रकृतेर्नामान्तरम् । २. मलविसर्जनद्वारम् । ३. मूत्रविसर्जनेन्द्रियम् । ४. मुक्तः ।

1. एवं तावदा. क०, ख० । 2. जलम- क०, ख० । 3. ज्ञात्वा क०, ख० । 4. स्पर्शनश- क०, ख० । 5. गुणेषु क० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ ५. इत्येवं प्रकृतिपुरुषयोर्भेदविज्ञानात् प्रकृतिनिवृत्तौ पुरुषस्य सुषुप्तपुरुषवदव्यक्त-चैतन्योपयोगेन[1] स्वरूपमात्रावस्थानलक्षणो मोक्षः। तस्य चोपायः पञ्चविंशतितत्त्वपरिज्ञानमेव।

"पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे स्थितः।
जटी मुण्डी शिखी केशी मुच्यते नात्र संशयः[१]॥"

[ ] इति वचनात्

[उत्तरपक्षः]

§ ६. तदेतत्कपिलमतं दृष्टविरुद्धम्। तथा हि—तावत्पुरुषव्यतिरिक्तसर्वार्थाः प्रधानमयाः कापिलैरिष्टाः। तच्च प्रधानं सर्वदा वर्तते नित्यत्वात्, सर्वत्र च वर्तते तस्य व्यापकत्वेनाभ्युपगमात्, सर्वत्र च संपूर्णतया वर्तते तस्य सर्वथानिरवयवत्वेनेष्टत्वात्। तथा च 'सर्वं सर्वत्र वर्तते' इत्यायातम्। 'सर्वमयं प्रधानं सर्वत्र साकल्येन वर्तते' इत्यभ्युपगमे 'सर्वं सर्वत्र वर्तते' इत्यस्यावश्यमभ्युपगन्तव्यत्वात्।

§ ७. नन्विष्टापादनमिदं सर्वं सर्वत्र चास्त इति कापिलैरुररीकरणादिति चेत्; तदिदं हि स्पष्टं दृष्टविरुद्धम्; प्रत्यक्षेण प्रतिनियतदेशकालस्यैवार्थस्य दर्शनात्। न हि प्रत्यक्षेण सर्वं सर्वत्र दृश्यते। अङ्गुल्यग्रे हस्तियूथशतादेरपि दर्शनप्रसंगात्।

§ ८. ननु नैष दोषः सर्वस्य सर्वत्र सद्भावेऽपि यत्र यस्याविर्भावः स एव तत्र दृश्यते न पुनरन्यस्तिरोहितः, इत्यर्थानां दर्शनयोग्यायोग्यत्वव्यवस्थितेरिति चेत्; कोऽयमाविर्भावो नाम—प्रागनुपलब्धस्य व्यञ्जकव्यापारादुपलम्भ इति चेत्; स च नित्यो वाऽनित्यो वा; यद्यनित्यः, तदा स प्रागसन् कारणैः क्रियेत, अन्यथा नित्यत्वप्रसंगात्, तथा च घटादिरपि तद्वत् प्रागसन् कारणैः क्रियताम्,[2] न चैवं, सत्कार्यवादविरोधात्। आविर्भावः प्रागसन् कारणैः क्रियेत न[3] पुनर्घटादिरिति स्वरुचिवचनमात्रं निरुपपत्तिकत्वात्। यदि नित्यः, तदा तदेव सर्वत्र सर्वस्य दर्शनं स्यात्, आविर्भावस्य सदा सत्त्वात्।

§ ९. अथाविर्भावस्य प्राक्तिरोहितस्य सत एव [4]कारणैराविर्भावान्तरमिष्यते, तर्हि तस्याप्यन्यत्तस्याप्यन्यदाविर्भावनमित्यनवस्थानान्न कदाचित् घटादेराविर्भावः स्यात्।

§ १०. अथाविर्भावस्योपलम्भरूपस्य तद्रूपाविर्भावान्तरानपेक्षत्वात्[6] प्रकाशस्य प्रकाशान्तरानपेक्षत्ववन्नानवस्थेति मतम्; तर्हि तस्य कारणस्य कारणादात्मलाभोऽ[7]भ्युपगन्तव्यः, उत्पत्ति-अभिव्यक्तिभ्यां प्रकारान्तराभावात् तत्र चोक्तदोष इति नाविर्भावः सिद्ध्येत्।

§ ११. यत्तेन तिरोभावेऽपि[8] प्रत्यादिष्टप्रायः[9] तस्य नित्यानित्यपक्षयोरुक्तदोषानुषङ्गात्। आविर्भावस्य निरस्तत्वेन तृतीयपक्षस्य चाऽसंभवात्। एवमाविर्भावतिरोभावयोरसिद्धौ तद्वशात् क्वचित्कस्यचित् प्रतीतेरनुपपत्तेः सर्वं सर्वत्र दृश्यताम्। न चैवम्; इति प्रत्यक्षविरोधस्तदवस्थ [10]एव।

---

१. श्लोकोऽयं सांख्यका॰ माठरवृत्तौ 'यदुक्तम्' इति कृत्वा उद्धृतः।

1. चैतस्योप- क॰, चैतन्ययोगेन ख॰। 2. क्रियाम् क॰, ख॰। 3. क्रिये न क॰। 4. एवाकारणै ख॰। 5. कदाचिर्घ- क॰। 6. -तरापेक्ष- क॰। 7. लाभोऽप्युप- क॰। 8. -भावोऽपि ग॰। 9. -धिष्ट क॰। 10. -वस्थं वा क॰, ख॰।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ १२. तथा सत्युपलब्धियोग्यत्वे सत्यनुपलब्धेः नास्ति प्रधानम्। तदभावे तन्निमित्तका महदादयोऽपि न सिद्ध्येयुरिति सर्वाभावः। तथापि यदि वैय्यात्यात्[१] महदादिसृष्टिप्रक्रियोच्यते, तदायं प्रष्टव्यः—किमिदं महदादिकं प्रधानस्य कार्यं वा परिणामो वेति, प्रथमपक्षे न तावत् सतस्तस्य कार्यत्वम्; सर्वथा सतः [1]कारणवैय्यर्थ्यात् पुरुषवत्।

"यदि सत् सर्वथा[२] कार्यं पुंवन्नोत्पत्तुमर्हति।"

[आप्तमी० श्लो० ३९] इति वचनात्।

नाप्यसतः;

"असदकरणादुपादानग्रहणात् सर्वसंभवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्॥"

[सांख्यका० ९]

इति [3]स्वसिद्धान्तविरोधात्। सर्वथाप्यसतः उत्पत्तिविरोधाच्च।

"यद्यसत्सर्वथा कार्यं तन्माजनि खपुष्पवत्।"

[आप्तमी० श्लो० ४२] इति वचनात्।

§ १३. द्वितीयपक्षे परिणामिनो[4] बहुधानकस्य परिणामा महदादयोऽत्यन्तं भिन्ना वा स्युः अभिन्ना वा, तत्र परिणामानां तदभिन्नानां [5]क्रमशो वृत्तिर्मा भूत् परिणामिनोऽक्रमत्वात्। ततो भिन्नानां व्यपदेशो न स्यात् संबन्धासिद्धेरनुपकारकत्वात्।

§ १४. न तावत् प्रधानं परिणामानामुपकारकम्; तत्कृतोपकारान्तरस्य कार्यत्वे सदसत्पक्षोक्तदोषानुषंगात्। परिणामत्वेतरभिन्नानां क्रमोत्पत्तिर्मा भूत्। भिन्नानां व्यपदेशो न स्यात् संबन्धासिद्धेरनुपकारात्। उपकारान्तरकल्पनायामनवस्थाप्रसंगात्। परिणामैः प्रधानस्योपकारे यावन्तो हि परिणामास्तावन्तस्तस्योपकारास्तत्कृतास्ततो यदि भिन्नाः, तदा तस्येति व्यपदेशोऽपि मा भूत् संबन्धासिद्धेरनुपकारकत्वात्। [6]तद्वतस्तैरुपकारान्तरेऽपि स एव पर्यनुयोगः इत्यनवस्था। ततस्ते यद्यभिन्नास्तदा तावद्धा प्रधानं भिद्येत। ते वा प्रधानैकरूपतां प्रतिपद्येरन्निति प्रधानस्योपकाराणां चावस्थानासम्भवः।

§ १५. अथ न भिन्नो नाप्यभिन्नः परिणामः. केवलं महदादिरूपेण प्रधानं परिणमते दण्डकुण्डलाद्याकारैः सर्पवदिति चेत्; तदेतत् स्वेष्टनित्यैकान्तबाधकम्; पूर्वोत्तराकारपरिहारावाप्तिस्थितिलक्षणपरिणामाभ्युपगमे [7]नित्यानित्यात्मकत्वस्यावश्यम्भावात्।

§ १६. तदेवमनेकबाधकोपनिपातात्[8] प्रधानादिचतुर्विंशतितत्त्वानि न व्यवतिष्ठन्ते। तदव्यवस्थितौ भोग्याभावे पुंसो भोक्तृत्वाभावादभावः स्यात्तस्य तल्लक्षणत्वात्। ततः प्रकृतिपुरुषतत्त्वयोरवस्थानाभावात् सांख्याभिमतं सर्वं तत्त्वं पुनरपि शून्यं जायत इति तत्कथं प्रत्यक्षसिद्धं स्यात्;

---

१. विपरीताग्रहात्। २. पुरुषस्य।

1. करणवै- क०, ख०। 2. सर्वदा क०। 3. इति सिद्धान्त ग०। 4 परणामिनो क०, ख०। 5. क्रमतो ग०। 6. तद्वतस्तैरकालैरुप- गं०। 7. यात्वक क०। 8. -को निपातात् क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्यात्, उर्वीपर्वततर्वादिपदार्थानां ब्रह्ममयत्ववत् प्रधानमयत्वस्यापि प्रत्यक्षेणानुपलक्षणात् सिद्धं सांख्यशासनं दृष्टविरुद्धम्।

§ १७. तथा तदिष्टविरुद्धं च। कापिलाभिमतस्य कूटस्थनित्यपुरुषस्य कथंचित्तदनित्यत्वसाधकानुमानेन विरुद्धत्वात्। तच्चेदम्—विवादापन्नः पुरुषः स्यादनित्यः, अनित्यभोगाभिन्नत्वात्। यदित्थं तदित्थं दृष्टम्; यथा भोगस्वरूपमिति। नासिद्धं भोगस्यानित्यत्वम्, 'अनित्यो भोगः उत्पत्तिमत्त्वात्, ज्ञानवत्' इत्यनुमानात्तत्सिद्धेः१[1]।

§ १८. कथमुत्पत्तिमान् भोग इति चेत्, परापेक्षत्वात्तद्वदेव परापेक्षोऽसौ बुद्ध्यध्यवसायापेक्षत्वात्। **"बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते"** [ ] इति वचनात्। भोगस्य बुद्ध्यध्यवसायानपेक्षत्वे पुंसः सर्वत्र सर्वदा सर्वभोगप्रसंगात्। भोग्यसंनिधिसव्यपेक्षतया [2]कादाचित्कत्वाच्चानित्यः सिद्धो भोगः। तस्य च पुरुषाद् भेदे तेन तस्य गगनादेरिव पुरुषान्तरस्यैव वा भोक्तृत्वानुपपत्तेः। ततो भोगस्याभेदे तद्रूपतया पुरुषस्य कथंचिदनित्यत्वं सिद्ध्यतीति सम्यगिदं साधनमात्मानित्यत्वं साधयति। ततः सूक्तम्—सांख्यमतमिष्टविरुद्धमिति।

§ १९. तथा चतुर्विधवर्णाश्रमतत्तद्विधेयविविधाचारपुण्य-पाप-परलोक-बन्ध-मोक्ष-तत्कारण-तत्फल-बद्ध-मुक्तादिस्वरूपप्रतिपादकः सांख्यागमो न प्रमाणं दृष्टेष्टविरुद्धागमाभिन्नस्य तस्य परोक्षतत्कारणेषु प्रामाण्यसंभावनानुपपत्तेरिति न तेषां धर्मानुष्ठानं प्रतिष्ठामियर्ति। किमत्र बहुनोक्तेन यत् किंचित् सेश्वरनिरीश्वरसांख्यैरसंख्यावद्भिराख्यायते तत्सर्वं मृषैव, तदभिमतसकलतत्त्वानामा[3]विर्भावाद्यपाकरणद्वारेण शून्यत्वस्यापादितत्वादित्यलं प्रसंगेन, दृष्टेष्टविरुद्धत्वात् सांख्यशासनस्यासत्यत्वसिद्धेः।

दृष्टेष्टेषु[4] दृष्टेष्टविरोधात् सांख्यसंमतः।
परोक्षेषु तदेकत्वादागमो न प्रमाणताम्[5]॥
आविर्भावच्युतौ सर्वच्युतेः सांख्यवचोऽखिलम्।
भवेत् प्रलापमात्रत्वात् नावधेयं विपश्चिताम्॥
न सांख्यशासनं सत्यं दृष्टदृष्टेष्टबाधतः।
न च तेन प्रतिक्षेपः स्याद्वादस्येति निश्चितम्॥

[इति सांख्यशासन-परीक्षा]

---

१. पुरुषात्।

1. -मानात्सिद्धेः क०, ख०। 2. कदाचित्- क०, ख०। 3. तत्त्वामावि- क०। 4. दृष्टेष्विष्टेषु ख०, ग०। 5. प्रमाण्यताम् क०, ग०। 6. -दश्चेति क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[वैशेषिकशासन-परीक्षा]

[पूर्वपक्षः]

§ १. अथ वैशेषिकमतमपि दृष्टेष्टविरुद्धम् । तावदिदं हि तेषामाकूतम्—बुद्धिसुखदुखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारणां नवानामात्मविशेष[1]गुणानामत्यन्तोच्छित्तावात्मनः स्वात्मन्यवस्थानं मोक्षः, अन्यथा आत्मनोऽत्यन्तविशुद्ध्यभावादिति । "द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानं[2] निःश्रेयसहेतुः ।" [प्रश० भा० पृ० ६] शैवपाशुपतादिदीक्षाग्रहण-जटाधारण-त्रिकालभस्मोद्धूलनादितपोऽनुष्ठानविशेषश्च ।

§ २. "तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि सामान्यविशेषसंज्ञोक्तानि नवैव। तद्व्यतिरेकेण संज्ञान्तरानभिधानात् ।" "गुणाः रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्व–अपरत्व–बुद्धि-सुख-दुःख–इच्छा-द्वेष-प्रयत्नाश्च कण्ठोक्ताः सप्तदश, चशब्दसमुच्चिताश्च गुरुत्व-द्रवत्व-स्नेह-संस्कारादृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशतिगुणाः ।" [प्रश० भा० ८, पृ० १०] "उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानीति पञ्चैव कर्माणि । गमनग्रहणाद्भ्रमणरेचनस्पन्दनोर्ध्वज्वलनतिर्यग्पतननमनोन्नमनादयो गमनविशेषा न जात्यन्तराणि[3] ।" [प्रश० भा०, पृ० ११] "सामान्यं द्विविधम्, परमपरं चानुवृत्तिप्रत्ययकारणम् ।

§ ३. "तत्र परं सत्ता महाविषयत्वात्, सा चानुवृत्तेरेव हेतुत्वात् सामान्यमेव । द्रव्यत्वाद्यपरम् अल्पविषयत्वात् । तच्च व्यावृत्तेरपि हेतुत्वात्सामान्यं सद्विशेषाख्यामपि लभते । नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः । ते खल्वत्यन्तव्यावृत्तिबुद्धिहेतुत्वात् विशेषा एव । अयुतसिद्धानामाधार्याधारभूतानां यः संबन्ध इह प्रत्ययहेतुः स समवायः ।

§ ४. "एवं धर्मैर्विना धर्मिणामुद्देशः कृतः । षण्णामपि पदार्थानां साधर्म्यमस्तित्वमभिधेयत्वं ज्ञेयत्वम् । आश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः[4] । द्रव्यादीनां पञ्चानामपि समवायित्वमनेकत्वं च । 'गुणादीनां पञ्चानामपि[2] निर्गुणत्व-निष्क्रियत्वे ।" [प्रश० भा०, पृ० ११–१६] इत्याद्यनेकविधं साधर्म्यं वैधर्म्यं चेति तत्त्वज्ञानं मोक्षहेतुः । तद्यथा, "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये[3] तदनन्तराभावादपवर्गः ।" [न्यायसू० १।१।२]

§ ५. तत्र तत्त्वज्ञानान्मिथ्याज्ञानं निवर्तते; मिथ्याज्ञाननिवृत्तौ तज्जन्यरागद्वेषनिवृत्तिः; तद्दोषनिवृत्तौ तज्जन्यकायवाङ्मनोव्यापाररूपप्रवृत्तिनिवृत्तिः[4]; तत्प्रवृत्तिनिवृत्तौ तज्जन्यपुण्यपाप-

---

१. 'नवानामात्मविशेषगुणानामत्यन्तोच्छित्तिर्मोक्षः ।'—प्रश० व्यो० पृ० ६३८ । २. 'धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसः ।'—वैशे० सू० १।१।४। ३. किं तु गमन एवान्तर्भूतानि । ४. नित्यद्रव्याणि न कार्यद्रव्यवत् स्वकारणाश्रितानि भवन्ति ।

1. नवानामात्मगुणविशेषाणाम् क०, ख० । 2. –दीनामपि क०, ख० । 3.—त्तरपाये क०, ख० । 4. प्रवृत्तिर्निवर्तते ख० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बन्धलक्षणजन्मनिवृत्तिरित्यागामिकर्मबन्धनिवृत्तिस्तत्त्वज्ञानादेव भवति। प्रागुपार्जिताशेषकर्मपरिक्षयस्तु भोगादेव नान्यथा। तथा चोक्तम्—

"नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि।
अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्॥"

[ ] इति

§ ६. तत्रापि—

"कुर्वन्नात्मस्वरूपज्ञः भोगात्कर्मपरिक्षयम्।[1]
युगकोटिसहस्राणि कृत्वा तेन विमुच्यते॥"

[ ]

इत्येकः पक्षः।

"आत्मनो वै शरीराणि बहूनि मनुजेश्वरः।
प्राप्य योगबलं कुर्यात् तैश्च सर्वां महीं वरेत्[2]॥
भुञ्जीत विषयान् कैश्चित् कैश्चिदुग्रं तपश्चरेत्।
संहरेच्च पुनस्तानि सूर्यस्तेजोगणानिव॥"

[ ] इति

एकस्मिन्नेव भवे बहुभिः शरीरैः प्रागुपार्जिताशेषफलभोग इत्यपरः पक्षः। ततश्च भोगात् प्रागुपार्जिताशेषकर्मपरिक्षये[3] एकविंशतिभेदभिन्नदुःखनिवृत्तिरिति।

§ ७. तानि दुःखानि कानीति चेत्[4],

"संसर्गः सुखदुःखे च तपा[था]र्थेन्द्रियबुद्धयः।
प्रत्येकं षड्विधाश्चेति दुःखसंख्यैकविंशतिः॥"

[ ] इति

सकलपुण्यपापपरिक्षयात् तत्पूर्वकबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नसंस्काराणामपि परिक्षये आत्मनः कैवल्यं मोक्ष इति।

[उत्तरपक्षः]

§ ८. तदेतदौलूक्यशासनं[5] तावत् [6]दृष्टविरुद्धम्। तदभिमतस्यावयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योर्भेदैकान्तस्य तदभेदग्राहिणा प्रत्यक्षेण [7]विरुद्धत्वात्।

§ ९. न ह्यवयव्यादिरवयवादिभ्यः सर्वथा भिन्न एव प्रत्यक्षे प्रतिभासते, अपि तु कथंचिदभिन्न एव। तन्तुभ्यः तदातानवितानावस्थाविशेषरूपस्य पटस्य कर्पट्यादेश्चित्रज्ञाने नीलादिनिर्भासवत्; तत्रैकलोलीभावमुपगतानां[9] रूपादीनां गच्छतः, पुरुषाद् बाल्यादिवत्, स्थित्यादिवद्वा तदवस्था विशेषभूतक्रियायाः सामान्यवतोऽर्थाद् वैसादृश्यवत्तद्धर्मभूतसादृश्यलक्षणसामान्यस्य अनर्थान्तरतया सकललोकसाक्षिकमध्यक्षेणादध्यवसायात्।

1. –परीक्षयम् क०। 2. इदं पद्यं क०, ख० प्रतौ नास्ति। 3. –कर्मपरिकर्मक्षये क०, ख०। 4. तानि चेत् ग०। 5. -लुक्यशा क०। 6. -नं दृष्ट- ग०। 7. प्रत्यक्षेणावि- ग०। 8. चित्रपट्यादौ इत्यर्थः। कर्कट्यादेः क०, ख। 9. लोविभा- ग०। 10. –णाध्यवसायात् क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ १०. ननु समवायात्तेभ्योऽवय[1]व्यादिरर्थान्तरमिव प्रतिभासत इति चेत्; न, ❀अवयव्यादिप्रत्यक्षस्य सर्वत्र भ्रान्तत्वप्रसंगात्, तिमिराशुभ्रमणनौयानसंक्षोभाद्याहितविभ्रमस्य [1]धावध्वादिदर्शनवदसदाकारविशिष्टार्थग्रहणात्। तथा चाव्यभिचारित्वं [2]प्रत्यक्षलक्षणमसंभवि स्यात्।

§ ११. न चैते अवयवादयः, इमे अवयव्यादयः, समवायश्च तेषामयमिति प्रत्यक्षबुद्धौ [3]विस्रसा भिन्ना सकृदपि प्रतीयन्ते प्रत्यक्षतां च स्वीकर्तुमिच्छन्तीति तेऽमी अमूल्यदानक्रयिणः; प्रत्यक्षबुद्धावात्मानर्पणेन प्रत्यक्षतास्वीकरणात्।

§ १२. न च [2]परोपवर्णितस्वरूपः समवाय एव व्यवतिष्ठते। यतो भिन्नानामभेदप्रतिभास इष्यते। तथा हि नित्यव्यापकैकरूपतया परैरभिमतः स समवायः समवाय्याश्रितोऽनाश्रितो वा, यदाश्रितः तदा परमार्थतः, उपचाराद्वा, तत्र न परमार्थतः समवायः समवाय्याश्रितः [4]तयोः संबन्धाभावात्। न हि तावत्तयोः समवायः संबन्धः; समवायस्यैकत्वात्। समवायस्य समवायान्तरेण वृत्तौ तस्यापि तदन्तरेणैव [3]वृत्तिरित्यनवस्थोपनिपातात्। नापि संयोगः, तस्य[5] गुणत्वेन द्रव्याश्रितत्वात्, द्रव्यत्वाच्च समवायस्य। नापि विशेषणविशेष्यभावः; संबन्धान्तराभिसंबद्धार्थेष्वेवास्य[6] प्रवृत्तिप्रतीतेः दण्डपुरुषादिवत्, अन्यथा सर्वं सर्वस्य विशेषणं विशेष्यं च स्यात्। न च समवायसमवायिनां संबन्धान्तराभिसंबद्ध[4]त्वम्; संयोगसमवाययोरनभ्युपगमात् विशेषणविशेष्यभावान्तरेण संबद्धत्वे तस्यापि तदन्तरेण संबद्धेष्वेव प्रवृत्तिरित्यनवस्थानात्। नाप्यदृष्टम्, षोढा[7] संबन्धवादित्वव्याघातात्। यदि चादृष्टेन समवायः संबद्धयेत्; तर्हि गुणगुण्या[8]दयोऽप्यत[5] एव संबद्धा भविष्यन्तीत्यलं समवायादिकल्पनयेति न संबन्धान्तरेण समवायस्य संबन्धः सिद्धयति।

§ १३. ननु न [6]समवायस्य संबन्धान्तरेण संबन्धोऽस्माभिरिष्टः येनानवस्थादिदोषाः स्युः, अपि तु अग्नेरुष्णतावत् स्वत एवास्य संबन्धो युक्तः स्वत एव संबन्धरूपत्वात्, न संयोगादीनां [9]तदभावात्। न ह्येकस्य स्वभावोऽन्यस्यापि, अन्यथा स्वतोऽग्नेरुष्णत्वदर्शनात् जलादीनापि तत्स्यादिति चेत्; तदपि प्रलापमात्रम्; यतः प्रत्यक्षप्रसिद्धे पदार्थस्वभावे स्वभावैरुत्तरं वक्तुं युक्तम्।

"प्रत्यक्षेण प्रतीतेऽर्थे यदि पर्यनुयुज्यते।
स्वभावैरुत्तरं वाच्यं दृष्टे काऽनुपपन्नता॥"

[ ] इति वचनात्।

अन्यथा तथोत्तरेण[10] सर्वस्य स्वेष्टसिद्धिप्रसंगात्।

§ १४. न च समवायस्य स्वतः संबन्धत्वं संयोगादीनां तु तस्मादित्यध्यक्षप्रसिद्धम्; तत्स्वरूपस्याध्यक्षागोचरत्वप्रतिपादनात्। **"अत एवातीन्द्रियः सत्तादीनामिव प्रत्यक्षेषु वृत्त्यभावात्, स्वात्मगतसंवेदनाभावाच्च।"** [प्रश० भा० पृ० ६९७] इति[11] प्रशस्तपादभाष्येऽभिधानात्।

१. गच्छद्वृक्षादिदर्शनवत्। २. 'इन्द्रियार्थसन्निकर्षोत्पन्नमव्यपदेश्यव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्' –न्यायसू० १।१।४। ३. स्वभावेन। ४. समवाय-समवायिनोः। ५. संयोगस्य। ६. विशेषविशेष्यभावस्य। ७. संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषण-विशेष्यभावश्चेति। ८. अदृष्टादेव। ९. स्वतः संबन्धरूपत्वाभावात्। १०. 'स्वभावात्' इत्युत्तरेण। ११. 'तस्मादिह बुद्ध्यनुमेयः समवायः' –प्रश० भा०।

1. ❀एतदन्तर्गतः पाठः क०, ख० प्रतौ नास्ति। 2. रोक्षव– क०, ख०। 3. वृत्तिरित्यवस्थो– ख०। 4. समवन्धत्वम् क०। 5. गुणादयोऽपि ग०। 6. ननु सम– क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'समवायः पदार्थान्तरेण संबद्ध्यमानो न स्वतः संबद्ध्यते संबद्ध्यमानत्वात् रूपादिवत्' इत्यनुमानविरोधाच्च ।

§ १५. यदि चाग्नि-प्रदीपश्च मांसादीनामुष्णप्रकाशाशुचित्ववत् समवायः स्वपरयोः संबन्धहेतुः, तर्हि तद्दृष्टान्तावष्टम्भेनैव ज्ञानं स्वपरयोः प्रकाशहेतुः किं न स्यात्; तथा च **"ज्ञानं ज्ञानान्तरवेद्यं प्रमेयत्वात्"** [ ][१] इति विप्लवते ।

§ १६. किं च, यथा अर्थानां [1]सदात्मकस्य भावस्य नान्यः सत्तायोगोऽस्ति एवं द्रव्यादीनां [2]वृत्त्यात्मकस्य समवायस्य नान्या वृत्तिरस्ति, तस्मात् स्वात्मवृत्तिरिति मन्वानः पदार्थानां [3]संवेदनात्मकस्य ज्ञानस्य नान्यतः संवेदनम्, तस्मात् स्वतः संवेदनमिति किं न मन्येत्, भाववत्तादात्म्याविशेषात्। तदविशेषेऽपि सत्तादृष्टान्तेन समवायस्यैव स्वतो वृत्तिः स्यान्न पुनर्ज्ञानस्य स्वसंवेदनमिति स्वरुचिविरचितदर्शनप्रदर्शनमात्रम्। स्वतः संबन्ध इव स्वतः संवेदनेऽपि स्वात्मनि क्रियाविरोधाभावात्, अन्यथा तत्रापि तत्प्रसंगात्। तस्यैकस्यैव संघटनीय-संघटकत्वभावात्।

§ १७. यच्चोच्यते--समवायः संबन्धान्तरं नापेक्षते स्वतः संबन्धत्वात्; ये तु संबन्धान्तरमपेक्षन्ते न ते स्वतः संबन्धाः, यथा घटादयः, न चायं न स्वतः संबन्धः, तस्मात्संबन्धान्तरं नापेक्षत इति; तदपि मनोरथमात्रम्; संयोगेनानेकान्तात्। स हि स्वतः संबन्धः संबन्धान्तरं चापेक्षते। न हि स्वतोऽसंबन्धस्वभावत्वे संयोगादेः [२]परतस्तद्युक्तम्; अतिप्रसंगात्। 'समवायः पदार्थान्तरेण संश्लेषे संबन्धान्तरमपेक्षते, पदार्थान्तरत्वात्, यदित्थं [तदित्थं], यथा संयोगः, तथा चायम्, तस्मात्तथैव, इत्यनुमानबाधितविषयत्वाच्च ।

§ १८. किं च, यथा समवायः स्वरूपापेक्षयाऽभेदात् तदव्यतिरिक्तघटनीय-घटकाकारापेक्षया भेदाभेदाद्भेदात्मकः सिद्ध्यति, तथावयव्याद्यपेक्षयाऽभेदात्तदपृथग्भूतावयवापेक्षयाभेदात् सर्वं वस्तु भेदाभेदात्मकं[4] जात्यन्तरं सिद्ध्येत्, विरोधादिदूषणानां समवायदृष्टान्तेनापसारणात् इत्यर्हन्मतसिद्धिः तस्य तदिष्टत्वात् ।

"अभेदभेदात्मकमर्थतत्त्वं तव ।" [युक्त्यनु० श्लो० ७] इति वचनात् ।

तन्मतसिद्धौ 'पराभिमतभेदैकान्तरूपं वस्तु खपुष्पवदसदेव स्यात् ।'

"स्वतन्त्रान्यतरत् खपुष्पम्" [युक्त्यनु० श्लो० ७] इति वचनात् ।

§ १९. तदेवं स्वतः परतश्च समवायस्य समवायिषु वृत्तिर्न स्यात्, [३]अवृत्तिमत्त्वात् समवायवृत्तेर्न परमार्थतः समवायः समवाय्याश्रितः परैस्तस्य स्वातन्त्र्याभ्युपगमाच्च । नाप्युपचारात्, उपचारनिमित्ताभावात् ।

---

१. "तस्मात् ज्ञानान्तरसंवेद्यं संवेदनं वेद्यत्वात्। घटादिवत्"—प्रश० व्यो० पृ० ५२९ ।
२. संबन्धस्वभावत्वम् । ३. अन्येन संबन्धेन संबद्धत्वाभावात् ।

1. यथा सदात्मक– क०, ख० । 2. एवं वृत्त्यात्मकस्य क०, ख० । 3. –मन्वानः संवे– ख० ।
4. –तु भेदात्मकं ग० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ २०. ननु निमित्तमुपचारस्य समवायिषु सत्सु समवायज्ञानम्, समवायिशून्यदेशे समवायज्ञानासंभवादिति चेत्; तदसत्; दिगादीनामप्येवमाश्रितत्वप्रसंगात्; मूर्तद्रव्येषु सत्सु उपलब्धिलक्षणप्राप्तेषु दिग्लिङ्गस्य 'इदमतः[1] पूर्वेण' इत्यादि प्रत्ययस्य काललिङ्गस्य च परत्वापरत्वादिप्रत्ययस्य सद्भावात् मूर्तद्रव्याश्रितत्वोपचारप्रसंगात्। तथा च **"अन्यत्र नित्यद्रव्येभ्यः"**[प्रश० भा०, पृ० १६] इति वचनव्याघातः[2], नित्यद्रव्यस्यापि दिगादेरुपचारादाश्रितत्व[3]सिद्धेः। ततो नोपचारादप्याश्रितत्वं समवायस्य।

§ २१. अथानाश्रितः समवायः इति मतम्, तदा न संबन्धः समवायः संबन्धिभ्यां भिन्नस्योभयाश्रितस्यैव[4] संयोगवत् संबन्धत्वव्यवस्थितेः। तथा च प्रयोगः—समवायो न संबन्धः सर्वथाऽनाश्रितत्वात्, यो यः सर्वथाऽनाश्रितः स स न संबन्धः, यथा दिगादिः, सर्वथाऽनाश्रितश्च समवायः, तस्मान्न संबन्ध इति। न चात्रासिद्धो हेतुः, समवायस्य परमार्थत उपचाराच्चाश्रितत्वस्य निराकृतत्वात्।

§ २२. स्यादाकूतम्—समवायस्य धर्मिणोऽप्रतिपत्तौ हेतोराश्रयासिद्धत्वम्, प्रतिपत्तौ धर्मिग्राहकप्रमाणबाधितः पक्षो हेतुश्च कालात्ययापदिष्टः प्रसज्यते। समवायो हि यतः प्रमाणात्[5] प्रतिपन्नस्तत एवायुतसिद्धसंबन्धत्वं प्रतिपन्नम् अयुतसिद्धानामेव संबन्धस्य समवायव्यपदेशसिद्धेरिति, तदपि न साधीयः; समवायग्राहिणा प्रमाणेनाश्रितस्यैव समवायस्य अविष्वग्भावलक्षणस्य प्रतिपत्तेः,[6] तस्यानाश्रितत्वाभ्युपगमे च असंबन्धत्वस्य प्रसंगेन साधनस्य साधनात्। साध्यसाधनयोर्व्याप्यव्यापकभावसिद्धौ परस्य व्याप्याभ्युपगमे [2]तन्नान्तरीयकस्य व्यापकाभ्युपगमस्य प्रतिपादनात्। न ह्याश्रितत्वमसंबन्धत्वेन व्याप्तं दिगादिष्वसिद्धम्। नाप्यनैकान्तिकम्; अनाश्रितस्य कस्यचित् संबन्धत्वाप्रसिद्धेः विपक्षे वृत्त्यभावात्। तत एव न [9]विरुद्धं नापि सत्प्रतिपक्षम्; तस्यानाश्रितस्यापि संबन्धत्वव्यवस्थापकानुमानाभावादिति न परेषां समवायसंबन्धोऽस्ति, यतस्तद्वशादभिन्नानामप्यवयवव्यादीनामभेदेन प्रतिपत्ति[10]रुपपद्येत। ततस्ते भेदेनैव प्रतियेरन्[11] न चैवमतः प्रत्यक्षविरोधो दुःशकः परिहर्तुं परेषाम्।

§ २३. किं च, प्रतिपादितप्रकारेण समवायस्यासंभवे संयोगस्याप्यसंभवः तस्य कार्यस्य कारणसमवायाभावेऽनुपपत्तेः।

§ २४. एवं संबन्धाभावे न किंचित् वस्तु भेदैकान्तवादिमते व्यवतिष्ठते। तथा हि—तावत् परमाणूनां संयोगाभावे द्व्यणुकादिप्रक्रमेणावयविनोऽनुत्पत्तेः[12] कार्यरूपभूतचतुष्टयाभावः, तदभावे तत्कारण[3]चतुर्विधपरमाणवोऽपि न संभाव्यन्ते; कार्यलिङ्गत्वात् कारणस्य।

"कार्यभ्रान्तेरणुभ्रान्तिः कार्यलिङ्गं हि कारणम्।"

[आप्तमी० श्लो० ६८]

---

१. उक्तानुमाने २. तदविनाभाविनः। ३. कार्यभूतपृथिव्यादिकारण।

1. –स्येकदमतः क०, ख०। 2. वचनघातः ग०। 3. –रावाश्रित– क०। 4. –तस्यैकस्यैवा– क०, ख०। 5. प्रमाणाप्रतिपन्नः क०, ख०। 6. प्रतिपत्तिः क०, ख०। 7. असंबन्धस्य क०, ख०। 8. प्रसंगेन साधनात् ग०। 9. –व निरुद्धं क०, ख०। 10. प्रतीति– ख०। 11. प्रतियेतन् क०। 12. –विनोत्पत्तेः क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति वचनात्। तथा भूतचतुष्टयासत्त्वे [१]परापरादिप्रत्ययापायात्। 'इदमतः पूर्वेण' [२]इत्यादि प्रत्ययापायाच्च [न] कालो दिक्च व्यवतिष्ठते । तथा [३]भेरीदण्डाद्याकाशसंयोगाभावात् संयोगजशब्दस्यानुत्पत्तिः, सर्वत्रावयवसंयोगाभावे [४]तद्विभागस्याप्ययोगाद् विभागजशब्दस्याप्यनुत्पत्तिः; [५]तयोरनुदये शब्दजशब्दस्यासम्भवः; इति सकलशब्दानुत्पत्तेराकाशव्यवस्थापकोपायादाकाशहानिः। तथा आत्मान्तःकरणसंयोगासिद्धेः बुद्ध्यादिगुणानुत्पत्तिः; तदभावे चात्मव्यवस्थाप[3]कोपायासत्त्वादात्मतत्त्वहानिः। तथा बुद्ध्यनुत्पत्तौ मनसोऽसिद्धिः; क्रमतो ज्ञानोत्पत्तेर्मनोलिङ्गत्वात्। **"युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्"** [न्यायसू० १।१।१६] इति वचनात्।

§ २५. *एवं संयोगाभावे सर्वद्रव्याभावः। अथवा समवायाभावे सत्तासमवायासंभवात् सर्वद्रव्यः प्रच्युतः। सर्वद्रव्यहानौ तदाश्रितगुणकर्मसामान्यविशेषाणामसिद्धिः आश्रयाभावे सत्याश्रयिणा[म][4]भावात्, *[5]तन्त्वभावे पटाभाववदिति। संसर्गहानेः सकलार्थहानिर्दुर्निवारा वैशेषिकाणामुपनिपतति। तदुक्तं स्वामिसमन्तभद्रपादैः—

"अभेदभेदात्मकमर्थतत्त्वं तव स्वतन्त्रान्यतरत्खपुष्पम्।
अवृत्तिमत्त्वात् समवायवृत्तेः संसर्गहानेः सकलार्थहानिः॥"

[युक्त्यनु० श्लो० ७] इति

§ २६. एवं विचार्यमाणाः सर्वथाभिन्नावयवावयव्यादयः स्वयमेव न सन्ति यतः प्रत्यक्षेण प्रतिभासेरन्। तत्प्रत्यनीकाश्च [७]कथंचिद्भिन्नास्ते[८] प्रत्यक्षतः प्रतिभासन्त इति स्थितं दृष्टविरुद्धं शेषिकमतमिति।

§ २७. तथा तदिष्टविरुद्धं च। तथा हि—विवादापन्नं 'तनुकरणभुवनादिकं बुद्धिमद्धेतुकं कार्यत्वात् घटादिवत्' इति जगतो महेश्वरकृतत्वं यौगैः व्यवस्थाप्यते, तच्चानुमानविरुद्धम्, तद्बाधकानुमानसद्भावात्। तच्चेदम्—नेश्वरस्तन्वादीनां कर्ता, अशरीरत्वात्, य एवं स एवम्, यथात्मा, तथा चायम्, तस्मात्तथैवेति। न चात्रासिद्धो हेतुः, [8]तस्य शरीरत्वायोगात्। तच्छरीरस्य सावयवस्य[9] नित्यत्वानुपपत्तेः। [10]नित्यस्यापि तच्छरीरस्य बुद्धिमत्कारणापूर्वकत्वे तेनैव कार्यत्वादिहेतूनां व्यभिचारात्। तस्य बुद्धिमत्कारणसपूर्वत्वे वा परापरशरीरकल्पनायामनवस्थाप्रसंगात्। पूर्वपूर्वस्य शरीरेणोत्तरोत्तरस्वशरीरोत्पत्तौ [6]भवस्य निमित्तकारणत्वे सर्वसंसारिणां तथा प्रसिद्धेरीश्वरकल्पनावैयर्थ्यात्। स्वोपभोग्यभुवनाद्युत्पत्तावपि[11] तेषामेव निमित्तकारणत्वोपपत्तेरिति; तत् कार्यत्वाचेतनोपादानत्वसन्निवेशविशिष्टहेतवो गमकाः स्युः। **"अशरीरं वा[12]वसन्तं न प्रियाप्रिये स्पृशतः।"** [छान्दो० ८।१२।१] इत्यागमविरोधाच्च।

---

१. देशापेक्षया अपरस्मिन् परं युगपच्चिरं क्षिप्रमिति कार्यलिङ्गानि। २. इदमतो दक्षिणेनेत्यादि। ३. भेर्याकाशसंयोगो निमित्तकारणम्। ४. अवयवविभागस्यापि। ५. संयोगजविभागजशब्दयोरभावे। ६. अवयव्यादयः। ७-८. ईश्वरस्य।

1. प्रत्ययादिदमतः क०, ख०। 2. संयोगशब्द- क०, ख०। 3. -कोपायसत्त्व- ग०। 4. —यिणाभावा- क०, ख०। 5. —एतदन्तर्गतः पाठः ग० प्रतौ नास्ति। 6. प्रत्यक्षे प्रति- क०, ख०। 7. कथंचिदभिन्नाः क०, ख०। 8. नात्रासिद्धो क०, ख०। 9. सावयस्य क०, ख०। 10. -तेरनित्यस्यापि ख०। 11. भुवनाद्युत्तावपि क०, ख०। 12. -रं नावसन्तं क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ २८. एवमशरीरत्वे सिद्धे नेश्वरस्तस्य तन्वादीनां कर्ता स्यात्, वितनुकरणस्य [१] तस्य तत्कृतेरयोगात्। तादृशोऽपि निमित्तभावे कर्मणामचेतनत्वेऽपि तन्निमित्तत्वमविप्रतिषिद्धम्, सर्वथा दृष्टान्तव्यतिक्रमात्। यथैव हि कुलालादिसतनुकरणः कुम्भादेः प्रयोजको दृष्टान्तः तनुकरणभुवनादीनामशरीरेन्द्रियेश्वरप्रयोज[1]कत्वकल्पनयाव्यतिक्रम्यते तथा कर्मणामचेतनानामपि तन्निमित्तत्वं कल्पनया बुद्धिमानपि दृष्टान्तो व्यतिक्रम्यतां विशेषाभावात्।

§ २९. स्यान्मतम्—सशरीरस्यापि बुद्धीच्छाप्रयत्नवत एव कुलालादेः [2]कारकप्रयोक्तृत्वं दृष्टम्, कुटादिकार्यं कर्तुमबुद्ध्यमानस्य तददर्शनात्, बुद्धिमतोऽपीच्छापाये तदनुपलब्धेः; तदिच्छावतोऽपि प्रयत्नाभावे [२] तदनुपलम्भात्; तद्वद्वितनुकरणस्यापि बुद्धिमतः स्रष्टुमिच्छतः प्रयत्नवतः शश्वदीश्वरस्य समस्तकारकप्रयोक्तृत्वोपपत्तेर्न दृष्टान्तव्यतिक्रमः, सशरीरत्वेतरयोः कारकप्रयुक्ति प्रत्यनङ्गत्वात्। न हि सर्वथा दृष्टान्तदार्ष्टान्तिकयोः साम्यमस्ति, तद्विशेषविरोधादिति; तदयुक्तम्, बुद्ध्यादीनामपि [३] तस्या[3]संभवात्। ईश्वरो ज्ञानचिकीर्षाप्रयत्नत्रयवान्न भवति; अशरीरत्वात्; मुक्तात्मवदिति तदभावसिद्धेः। अशरीरत्वाविशेषेऽपि सादिमुक्तानामेव बुद्ध्यादिरहितत्वं न त्वनादिमुक्तस्येश्वरस्येति चेत्; न, अनादिमुक्तसिद्धेः। 'ईश्वरस्याशरीरत्वं सादि अशरीरत्वात् मुक्तात्माऽशरीरत्ववत्' इति तद्बाधकसद्भावात्। अत्राप्यशरीरत्वाविशेषेऽपि मुक्तात्माशरीरत्वमेव सादि न त्वीश्वराशरीरत्वमिति चेत्; न, अनुपपत्तिकत्वात्; जगत्कर्तृत्वसर्वज्ञत्वादीनामीश्वरविशेषणानां विवादगोचरत्वे न ततो वैलक्षण्याभिधानानुपपत्तेः। तथापि यदि तथेष्यते तर्हि कार्यत्वाविशेषेऽपि घट-पट-कट-कटक-शकट-मुकुटादीनां बुद्धिमद्धेतुकत्वं न तु मही-महीधर-महीरुहादीनामिति किं नेष्यते। [४] अकृतसमयस्यापि कृतबुद्ध्युत्पादकेभ्यो घटादिभ्यः [५] तदनुत्पादकभुवनादीनां वैलक्षण्यस्यापि संभवात्। एवमशरीरत्वे बुद्धीच्छाप्रयत्नवत्त्वासिद्धेः तदसिद्धौ सकलकारकप्रयोक्तृत्वानुपपत्तेः सूक्तमीश्वरस्तन्वादीनां न कर्तेति।

§ ३०. तथापि यदि वैय्यात्यादीश्वरः कर्तेत्यभिधीयते तदा प्राणिनां विचित्रघोरदुःखशतानीश्वरः करोति वा, न वा, यदि न करोति तदा तैः कार्यत्वादिहेतूनां व्यभिचारः। अथ करोतीति मतम्, तदसंभाव्यम्; इह हि कश्चिदसर्वज्ञो प्रणष्टरागद्वेषो मुनिरन्यो वा साधुः परपीडां न करोति किल, स एव महर्षीणामप्याराध्यः सर्वज्ञो वीतरागद्वेषमोहो भगवान् महेश्वरः प्राणिनामनिमित्तमसह्यविविधोग्रदुःखपरम्परामुत्पाद्य जगत्त्रयं परिपीडयतीति कथमिदं प्रेक्षावद्भिः संभाव्यते। तत्करणे वा तस्य अत्युग्रापूर्वराक्षसत्वमेव, न तु महद्भिः स्तुत्यं महेश्वरत्वमिति तस्य तत्करणमसंभाव्यम्।

§ ३१. ननु [न] प्राणिनामीश्वरो[4] दुःखमुत्पादयतीति चेत्; न; दुःखहेतूनामपि पापकर्मणामीश्वरकृतत्वे तस्यैव [६] दुःखहेतुत्वसिद्धेः, तत्पक्षोपक्षिप्तदोषानुषंगात्। तेषां [७] तदकृतत्वे तनुकरणादेरपि तत्कृतत्वं मा भूत्; विशेषाभावात्। कर्मभिरीश्वरसाधकहेतूनामनैकान्तिकत्वाच्च;

---

१. तनुकरणरहितस्य। २. कार्यकर्तृत्वाभावात्। ३. ईश्वरस्य। ४. अग्रहीतसंकेतस्यापि। ५. कृतबुद्ध्यनुत्पादक। ६. ईश्वरस्यैव। ७. कर्मणाम्।

1. –प्रजक– क०, ख०। 2. कारकः प्रयो– क०, ख०। 3. तस्य संभवात् क०। 4. –नादीश्वरो क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कर्मणामबुद्धिमन्निमित्तत्वेऽपि कार्यत्वार्थक्रियाकारित्वस्थित्वा(त्या) प्रवर्तनानां संभवात्। यदि [1]कल्पयित्वापीश्वरमवश्यं कर्मानुमन्यते; तदा केवलं कर्मैव तनुकरणादिनिमित्तमिष्यताम्, किमनेनेश्वरेण प्रमाणबाधितेन, तथा च परेषां पारंपर्यपरिश्रमपरिहारः स्यात्।

§ ३२. ननु कथमचेतनानां कर्मणां विचित्रोपभोगयोग्यतनुकरणाद्युत्पादकत्वमिति चेत्; कथमुन्मत्तमदिरामदनकोद्रवादीनामुन्मादादिविचित्रकार्योत्पादकत्वम्। कथं वा अयस्कान्तविशेषाणां लोहाकर्षणभ्रमणादि-कार्यकारित्वमित्यभिधीयताम्। तथादृष्टत्वादिति चेत्; तत एव प्रकृतः स्वभाव-व्यालम्भो[१]ऽपि निवर्त्यताम्। तथा 'सुखदुःखलाभालाभादीनामदृष्टं कारणमस्ति, दृष्टकारणव्यभिचारा-न्यथानुपपत्तेः' इत्यनुमितत्वात्। न चैवमीश्वरस्याप्यनुमितत्वादुपालम्भप्रसंगनिवृत्तिः स्यादिति शङ्कनीयम्, तदनुमानस्यानेकदोषदुष्टत्वात्।

§ ३३. तथाहि—तनुकरणभुवनादेः कार्यत्वादिसाधनं किमेकबुद्धिमत्कारणत्वं साधयेत्, अनेकबुद्धिमत्कारणं वा, प्रथमपक्षे प्रासादादिना अनेकसूत्रधारयजमानादिहेतुना तदनैकान्तिकम्। द्वितीयपक्षे सिद्धसाधनम्, नानाप्राणिनिमित्तत्वात्तदुपभोग्यतन्वादीनाम्, तेषां तददृष्टकृतत्वात्।

§ ३४. एतेन बुद्धिमत्कारणसामान्यसाधने सिद्धसाधनमुक्तम्; तदभिमतविशेषस्याधिकरण-सिद्धान्तन्यायेनाप्यसिद्धेः। सामान्यविशेषस्य साध्यत्वाददोष इति चेत्, न; दृष्टादृष्टविशेषाश्रय-सामान्यविकल्पद्वयानतिवृत्तेः। दृष्टविशेषाश्रयस्य सामान्यस्य साध्यत्वे स्वेष्टविघातात्। अदृष्टविशेषा-श्रयस्य सामान्यस्य साध्यत्वे साध्यशून्यत्वप्रसंगात्। निदर्शनाय दृष्टेतरविशेषाश्रयस्य सामान्यसाधनेऽपि स्वाभिमतविशेषसिद्धिः कुतः स्यात्।

§ ३५. अधिकरणसिद्धान्तन्यायादिति चेत्; कोऽयमधिकरणसिद्धान्तो[२] नाम, **"यत्सिद्धा-वन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः"** [न्यासू० १।१।३०] ततो दृष्टादृष्टविशेषाश्रयसामान्य-मात्रस्य बुद्धिमन्निमित्तस्य जगत्सु प्रसिद्धौ प्रकरणाज्जगन्निर्माणसमर्थः समस्तकारकाणां प्रयोक्ता सर्वदाऽविलुप्तशक्तिर्विभुरशरी[2]रत्वादिविशेषाश्रय एव सिद्ध्यतीति चेत्, स्यादेवम्, यदि सकल-जगन्निर्माणसमर्थेनैकेन समस्तकारकाणां प्रयोक्त्रा सर्वज्ञत्वादिविशेषोऽपि तेनाविनाभाविदृष्टेतरविशे-षाधिकरणबुद्धिमत्कारणसामान्यं कुतश्चित्सिद्ध्येत्; न च सिद्ध्यति; अनेकबुद्धिमत्कारणेनैव स्वोप-भोग्यतन्वादिनिमित्तकारणविशेषेण तस्य व्याप्तत्वसिद्धेः समर्थनात्। तथा सर्वज्ञवीतरागकर्तृकत्वे साध्ये घटादिना अनैकान्तिकं साधनम्। साध्यविकलं च निदर्शनम्। सरागसर्वज्ञकर्तृकत्वे साध्ये अप-सिद्धान्तः। सर्वथा कार्यत्वं च साधनं तन्वादावसिद्धम्, तस्य[३] कथंचित् कारणत्वात्। कथंचित् कार्यत्वं तु विरुद्धम्, सर्वथा बुद्धिमन्निमित्तत्वात् साध्याद्विपरीतस्य कथंचिबुद्धिमन्निमित्तत्वस्य साधनात्। तथा पक्षोऽप्यनुमानबाधितः स्यात् 'नेश्वरस्तन्वादीनां कर्ता ज्ञानादिरहितत्वात्, मुक्तवत्,' इति प्रागुक्तानुमानस्य तद्बाधकस्य भावादिति, जगतो बुद्धिमद्धेतुकत्वं न सिद्ध्यति, साधकस्याभावाद् बाधकस्य संभवाद्। ततः सूक्तमिष्टविरुद्धं वैशेषिकमतमिति।

[इति वैशेषिकशासन-परीक्षा]

---

१. व्युत्क्रमेण आ समन्तात् लम्भः प्राप्तिः। २. यत्सिद्धौ अन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः। ३. तन्वादेः।

1. –प इत्वा क०, ख०। 2. –र्विभूः शरीर क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[नैयायिकशासन-परीक्षा]

[पूर्वपक्षः]

§ १. वैशेषिकसमसिद्धान्ता नैयायिकास्त्वेवमामनन्ति—

"प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ।"

[न्यायसू० १।१।१]

§ २. किं च, भक्तियोग-क्रियायोग-ज्ञानयोगत्रयैर्यथासंख्यं सालोक्यं सारूप्यं सामीप्यं सायुज्यं मुक्तिर्भवति ।

§ ३. तत्र महेश्वरः स्वामी स्वयं भृत्य इति तच्चित्तो भूत्वा यावज्जीवं तस्य परिचर्याकरणं भक्तियोगः, तस्मात्सालोक्यमुक्तिर्भवति ।

§ ४. तपःस्वाध्यायानुष्ठानं क्रियायोगः । तत्रोन्मादकादिव्यपोहार्थमाध्यात्मिकादिदुःखसहिष्णुत्वं तपः, प्रशान्तमन्त्रस्येश्वरवाचिनोऽभ्यासः स्वाध्यायः, तदुभयमपि क्लेशकर्मक्षयाय समाधिलाभाय चानुष्ठेयम् । तस्मात्क्रियायोगात् सारूप्यं सामीप्यं वा मुक्तिर्भवति । विदितपदार्थस्येश्वरप्रणिधानं[1] ज्ञानयोगः ।

§ ५. परमेश्वरतत्त्वस्य प्रबन्धेनानुचिन्तनं पर्यालोचनमीश्वरप्रणिधानम् । तस्य योगस्य यम-नियम-आसन--प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयः अष्टाङ्गानि । तत्र देशकालावस्थाभिरनियताः पुरुषस्य विशुद्धवृत्तिहेतवो यमाः । अहिंसाब्रह्मचर्यास्तेयादयः देशकालावस्थापेक्षिणः पुण्यहेतवः क्रियाविशेषा नियमाः देवार्चन-प्रदक्षिण-संध्योपासन-जपादयः । योगकर्मविरोधिक्लेशजपाद्यर्थश्च रणबन्धः आसनम् । पद्मकस्वस्तिकादेः कोष्ठस्य वायोर्गतिच्छेदः प्राणायामः रेचकपूरककुम्भकप्रकारः शनैःशनैरभ्यसनीयः । समाधिप्रत्यनीकेभ्यः समन्तात्[2] स्वान्तस्य व्यावर्तनं प्रत्याहारः । चित्तस्य देशसंबन्धो धारणा । तत्रैकतानता ध्यानम् । ध्यानोत्कर्षान्निर्वाताचलप्रदीपावस्थानमिवैकत्र चेतसावस्थानं समाधिः । एतानि योगान्तानि मुमुक्षुणा महेश्वरे परां भक्तिमाश्रित्याभियोगेन सेवितव्यानि । ततोऽचिरेण कालेन भवन्तमनौपम्यस्वभावं प्रत्यक्षं पश्यति; तं दृष्ट्वा निरतिशयं सायुज्यं निःश्रेयसं प्राप्नोति ।

[उत्तरपक्षः]

§ ६. तदेतत्तार्किकमतं दृष्टेष्टविरुद्धम् । प्रागनन्तरं प्रतिपादितप्रकारेणैव प्रत्यक्षानुमानविरोधयोरत्राप्युपपत्तेः, अतो नात्र पृथक् तद्विरोधसमर्थनमुपक्रम्यते ।

§ ७. किं च, तदभ्युपगतपदार्थेषु इन्द्रियबुद्धिमनसाम् अर्थोपलब्धिसाधकत्वेन[१] प्रमाणत्वात् प्रमेयेष्वन्तर्भावानुपपत्तेः, अन्यथैकानेकात्मकत्वसिद्धेः । संशयादीनां प्रमेयत्वे[२] च व्यवस्थानानुपपत्तेः । विपर्ययानध्यवसाययोः प्रमाणादिषोडशपदार्थेभ्योऽर्थान्तरभूतयोः प्रतीतेश्च न षोडशपदार्थव्यवस्था ।

---

१. तन्मतेनैव । २. प्रमाणाविषयत्वे ।

1. प्रणवानं क० । 2. संमतात् क० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ ८. तथैवं नैयायिकवैशेषिकसिद्धान्तस्य दृष्टेष्टविरुद्धत्वे सिद्धे चतुर्विधवर्णाश्रमवत् तद्विधेयविविधाचारपुण्यपापपरलोकबन्धमोक्षतत्कारणतत्फलबद्धमुक्तादिस्वरूपप्रतिपादकोऽपि यौगागमो न प्रमाणम्, दृष्टेष्टविरुद्धागमाभिन्नस्य तस्यातीन्द्रियेषु तत्कारणेषु च प्रामाण्यसंभावनानुपपत्तेरिति न तेषां धर्मानुष्ठानं प्रतिष्ठामियर्ति। किं वा बहुभिरालापैः औलूक्यैः तार्किकैश्च लौकिकं वैदिकं वा यत्किंचिदुच्यते तत्सर्वं मृषैव तदभिमतसर्वतत्त्वानां संसर्गासंभवेन[१] शून्यत्वस्यापादितत्वादित्यलमतिप्रपञ्चेन, दृष्टेष्टविरुद्धत्वान्नैयायिकवैशेषिकमतयोरसत्यत्वसिद्धत्वात्।

दृष्टेष्विष्टेषु दृष्टेष्टविरोधाद्यौगसंमतः।
परोक्षेषु तदेकत्वादागमो न प्रमाणताम्॥
संसर्गहानेः सर्वार्थहानेर्यौगवचोऽखिलम्।
भवेत्प्रलापमात्रत्वान्नावधेयं विपश्चिताम्॥
दृष्टेष्टाभ्यां विरुद्धत्वान्न सत्यं यौगशासनम्।
न च तेन प्रतिक्षेपः स्याद्वादस्येति[1] निश्चितम्॥

[इति नैयायिकशासन-परीक्षा]

१. समवायादिसम्बन्धाभावेन।

1. द्वाश्चेति क०, ख०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[मीमांसक-भाट्टप्राभाकरशासन-परीक्षा]

[पूर्वपक्षः]

§ १. अथ मीमांसकमतमपि दृष्टेष्टविरुद्धम्। मीमांसकेषु तावदेवं भाट्टा भणन्ति—'पृथिव्यप्तेजोवायुदिक्कालाकाशात्ममनःशब्दतमांसि' इत्येकादशैव पदार्थाः, तदाश्रितगुणकर्मसामान्यादीनां तत्स्वभावत्वेन तादात्म्यसंभवान्न पदार्थान्तरमित्येवं पदार्थयाथात्म्यज्ञानात् कर्मक्षयो भवतीति।

§ २. प्राभाकरास्तु—

> "द्रव्यं गुणः क्रियाजातिसंख्यासादृश्यशक्तयः।
> समवायः क्रमश्चेति नव स्युर्गुरुदर्शने॥"
>
> [ ]

तत्र द्रव्या[1] [णि पृथिव्यादयः,] गुणा रूपादयः क्रिया उत्क्षेपणादि। जातिः सत्ता द्रव्यत्वादि। संख्या एकत्वद्वित्वादिः। सादृश्यं गोप्रतियोगिकं गवयगतमन्यत्, गवयप्रतियोगिकं गोगतं सादृश्यमन्यत्। शक्तिः सामर्थ्यम्, सा अनुमेयैव[2]। गुणगुण्यादीनां संबन्धः समवायः। एकस्य निष्पादनानन्तरमन्यस्य निष्पादनं क्रमः, प्रथमाहुत्यादिपूर्णाहुतिपर्यन्तम्। इत्येवं नवैव पदार्थाः। एतेषां याथात्म्यज्ञानान्निःश्रेयससिद्धिरित्याचक्षते।

§ ३. किं च, वेदमधीत्य तदर्थं ज्ञात्वा तदुक्तनित्यनैमित्तककाम्यनिषिद्धानुष्ठानक्रम निश्चित्य तत्र विहितानुष्ठाने यः प्रवर्तते तस्य स्वर्गापवर्गसिद्धिर्भवति। त्रिकालसंध्योपासनजपदेवर्षिपितृतर्पणादिकं नित्यानुष्ठानम्। दर्शपौर्णमासग्रहणादिषु क्रियमाणनैमित्तकानुष्ठानम्। तद्द्वयमपि नियमेन कर्तव्यम्। कुतः,

> "अकुर्वन् विहितं कर्म प्रत्यवायेन[1] लिप्यते।"
>
> [ ] इति वचनात्।

पुत्रकाम्येष्ट्यादिकमैहिकं काम्यानुष्ठानम्। ज्योतिष्टोमादिकमामुत्रिकं काम्यानुष्ठानम्। '[2]श्येनाभिचरन् यजेत्,' इत्यादिकं निषिद्धानुष्ठानम्। तत्क्रमं निश्चित्य तेष्वनुष्ठानेषु विहितानुष्ठाने यः प्रवर्तते स स्वर्गापवर्गौ प्राप्नोति।

§ ४. अपि च—

> "न्यायार्जितधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः[3]।
> श्राद्धकृत् सत्यवादी च गृहस्थोऽपि विमुच्यते॥"[3]
>
> [ ] इति वचनात्।

मुमुक्षूणां प्रव्रज्यया भवितव्यमिति नियमो नास्ति।

---

१. पापेन। २. श्येनयागेन। ३. गृहस्थो मोक्षमार्गस्थो··· इत्यादि। तुलना—रत्नकर० श्लो०

1. द्रव्यादि गुणरूपादयः क०, ख०। 2. सानुमयैव क०, ख०। 3. निष्ठातिथि क०।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

§ ५. तत्रापि—

"मोक्षार्थी न [1]प्रवर्तेत तत्र काम्यनिषिद्धयोः ।
नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया ॥"

[मी० श्लो० संबन्ध० श्लो० ११०] इति भाट्टाः ।

प्रत्यवायपरिहारकामेन नित्यनैमित्तकानुष्ठानयोः प्रवर्तनात् । तयोरपि काम्यानुष्ठानकुक्षौ निक्षेपात् तत्करणमपि मोक्षकांक्षिणाऽनवधीयते इति प्राभाकराः प्रत्यूचिरे ।

[उत्तरपक्षः]

